तैसं ५.६.१० इयं वाव प्रथमा चितिः ओषधयो (वनस्पतयः) पुरीषं, अन्तरिक्षं वाव द्वितीया चितिः वयांसि पुरीषं, असौ वाव तृतीया चितिः नक्षत्राणि पुरीषं, यज्ञो वाव चतुर्थी चितिः दक्षिणा पुरीषं, यजमानो वाव पञ्चमी चितिः प्रजाः पुरीषं, संवत्सरो वाव षष्ठी चितिः ऋतवः पुरीषम्। ४.४.४५

ऋ १.१६४.३५ इयं वेदिः। २.१.३२-इयं वेदिः परो अन्तः पृथिव्याः, अयं यज्ञो भुवनस्य नाभिः। अयं सोमो वृष्णो अश्वस्य रेतो, ब्रह्मायं वाचः परमं व्योम ॥

तैब्रा ३.५.२.९ इयं (पृथिवी) वै समिध्यमानवती (सामिधेनी), असौ (द्यौः) समिद्धवती (३.५.२.१०) यद् अन्तरा तद् धाय्या-पृथुपाजवत्यौ (३.६.१.३)। ५.३.४ सूत्र-समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युः, द्यावापृथिव्योरन्तराले समर्हणात्।

षड् ४.३.२ इषुः- प्रत्यवायः-तस्य इषुं विष्टुतिं कृत्वा अभिचरन् यजेत। ७.१.१२

षड् ४.३.२-७ इषु नामैकाहः, अभिचारिकः, ज्योतिष्टोमपूर्वकः ज्योतिष्टौमिकविध्यन्तः, इतरत श्येनेन। ७.१.१२

षड् ४.३.३ इषुं विष्टुतिं करोति। ७.१.१६ तं

शत १.७.१.२ 'इषे त्वा' इति आच्छिनत्ति, 'ऊर्जे त्वा' इति अनुमार्ष्टि संनयति वा। २.१.४७

शत १.७.१.२ — 'इषे त्वा' इति छिनत्ति। १२.३.२५–इष्यमाणाय अन्नाय भो पलाश ! त्वां छिनद्मि । –

तैसं १.१.१ — 'इषे त्वा' इति त्वान्तो मन्त्रः । २.१.३२

तैसं १.१.१ — 'इषे त्वा' ऊर्जे त्वा' इति भिन्नौ द्वौ मन्त्रौ । २.१.४७ सूत्र–समेषु वाक्यभेदः स्यात् ।

द्र.तैसं ५.६.९ — इष्टकाचयनेन अग्निश्चेतव्यः । ५.३.१६ इष्टकाभिर् अग्निं चिनोति ।

तैसं ५.६.९ — इष्टकाभिर् अग्निं चिनुते । ९.१.२६ चिनोति ।

तैसं १.८.७ — इष्टिपशुसोमदर्विहोमाश्च प्रधानभूताः राजसूये । १०.१.५

मैसं ३.८.३ ऋ १०.१.९ — इह वा स इह वा । २.१.३२

तैब्रा १.२.१.२७ — इहैव सन् तत्र सन्तं त्वां अग्ने। ३.८.१६

तैसं ३.१.७ — इहोक्थ्यानि स्युः । २.१.१ तं. यदि अग्निष्टोमः सोमः स्यात् पुरस्तात् उक्थ्यं कुर्वीत ॥ ईजाना बहुभिर् यज्ञैर् ब्राह्मणा वेदपारगाः । शास्त्राणि चेत् प्रमाणं स्युः प्राप्तास्ते परमां गतिम् ॥

तैसं ५.१.११ — ईड्यश्चासि वन्द्यश्च वाजिन् । २.१.३२ (+ आशुश्चासि मेध्यश्च सप्ते । अग्निष्ट्वा देवैर् वसुभिः सजोषाः, प्रीतं वह्निं वहतु जातवेदाः ॥

पा १.४.४९ — ईप्सिततमं ईद् कर्म (कर्तुः +) २.२.१४, १०.१.१४

पा १.४.४९ — ईप्सिततमं हि यत् साधनं तद् द्वितीयान्तेन उच्यते। २.२.१४ (कर्मणि द्वितीया) पा. २.३.२

पा ६.३.२७ — ईद् अग्नेः सोमवरुणयोः २.१.१ तं अग्नीषोमौ, अग्नीवरुणौ ।

ऋ ७.३२.२२ — ईशानमस्य जगतः स्वर्दृशं ईशानमिन्द्र तस्थुषः । ९.१.७

ऋ ७.३२.२२ — ईशानं स्वर्दृशं तस्थुषः । १०.६.२

वासं २४.२८ — ईशानाय परस्वत आलभेत, तत् प्रकृत्य श्रूयते (पर्यग्निकृतान् आरण्यान्

तैब्रा ३.९.३.३ — उत्सृजन्ति । अहिंसायै ।) ९.४.५१,५२

तां ७.७.१५ — ईश्वरं वै रथन्तरं उद्गातुश्चक्षुः प्रमथितोः, रथन्तरे प्रस्तूयमाने संमीलेत्, स्वर्दृशं प्रतिवीक्षेत नैनं चक्षुर् जहाति । १०.६.३

तैब्रा १.८.३.१ — ईश्वरो वा एष दिशोऽनून्मदितोर्, यं दिशोऽनु व्यवस्थापयति, दिशां अवेष्टयो भवन्ति, दिक्षु एव प्रतितिष्ठति । ११.४.९–११ न्यामा

आप १.१७.६ — ईषां आलभेत (स्पृशेत्) २.३.१२ आलभ्य ।

तां ११.११.२ सायण — उक्थ्यं तु यज्ञा यज्ञीयात् परं साम । ८.३.८–९ न्यामा

साम ७०३, ७०६ — यज्ञायज्ञीयं साम ७०३, तस्मात्परं ७०६ उक्थ्यं साम– ' एह्यूषु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर् वर्धास इन्दुभिः ।

तां १९.६.३ — उक्थ्यसंस्थे च गृहीतव्यं षोडशी । १०.५.४९ उक्थ्यः षोडशिमान् भवति

गोपथे १.५.२३ — उक्थ्यः षोडशी च संस्थाविशेषः । १०.६.१५ अग्निष्टोमोक्थ्यातिरात्रषोडशी-संस्थाः ।

शत ४.२.३.१० — उक्थ्याद् गृह्णाति षोडशिनम् । १०.५.४३,४५ उक्थेभ्यो ह्येनं (षोडशिनं) गृह्णाति ।

तैसं ६.६.८ — उक्थ्ये गृह्णीयात् (अतिग्राह्यान् ग्रहान्) १०.८.२३-२८ न्यामा यदुक्थ्ये गृह्णीयात् प्रत्यक्षं यज्ञं अतिग्राह्याः संशृणीयुः ।

जैब्रा २.८४ उक्थ्येन यजेत । उक्थ्यो यज्ञः । ३.६.४१ तं. स एष उक्थ्यो यज्ञः ।

ऐब्रा १६.४ उक्थ्ये हि द्वे निमित्ते स्तः – अग्निष्टोमस्तोत्रं उक्थ्यस्तोत्रं च, तत्र द्वौ नैमित्तिकौ स्तः – आग्नेयः पशुः, ऐन्द्राग्नश्च । ३.६.४२

वाराह ३.२.१.४६ उक्थ्यो वैरूपपृष्ठः । ३.८.४४ । सप्तदश उक्थ्यो वैरूपपृष्ठः ।

वाराह ३ २.१.४६ उक्थ्यो वैरूपसामा एकविंशः पृष्ठे कार्यः । ३.८.४४; १०.६.१५-२१ न्यामा इति प्रकृतिलिङ्गेन सामशब्देन वैरूपपृष्ठो गम्यते ।

अमरकोष २.३.३१ उखास्थाली चरुः । १०.१.३४-४४ न्यामा अमरः – पिठरः स्थाल्युखाकुण्डं । स्थालीवाची चरुशब्दः तात्स्थ्याद् ओदने ।

तैसं ५.५.१ उख्यस्य संवत्सराभरणेन कृतो दोषो वैश्वानरेण विहन्यते–४.४.१२ वैश्वानरं द्वादशकपालं पुरस्तात् निर्वपेत्, संवत्सरो वा अग्निर् वैश्वानरः, यथा संवत्सरं आप्त्वा काले आगते विजायते, एवमेव संवत्सरं आप्त्वा काले आगते अग्निं चिनुते । यो वै संवत्सरं उख्यं अभृत्वा । [उग्राणि ह वा एतानि घोराणि हवींषि यद् अमावास्यायां संभ्रियन्ते, आग्नेयं प्रथमं ऐन्द्रे उत्तरे । २.२.७; ११.२.५]

मैसं २.३.२ उग्रोऽसि उग्रस्त्वं देवेषु, अध्युग्रोऽहं सजातेषु भूयासं प्रियः सजातानां उग्रश्चेत्ता वसुवित् । ४४.७ परिधिमन्त्राः

ऋ १.११६.३ उग्रो ह भुज्युं (आख्यायिकास्वरूपं) २.१.३३ तुग्रो ह भुज्युं अश्विनोदमेघे, रयिं न कश्चिन् ममृवाँ अवाहाः । तमूहथुर् नौभिर् आत्मन्वतीभिर् अन्तरिक्षप्रुद्भिर् अपोदकाभिः ॥ २.१.३३

साम ६७२-७४ 'उच्चा ते जातमन्धसः' इत्येष माध्यन्दिनपवमानस्य आद्यस्तृचः,

साम ६८९-९१ 'स्वादिष्ठया' इति आर्भवपवमानस्य । ५.३.१३-१४ न्यामा

मैसं ३.६.५ उच्चैर् ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा । २.१.३८; ३.३.१.२

तां ७.७.१० उच्चैर् गेयं, बलवद् गेयम् । ९.२.४८ बलवद् गेयम् ।

वाराह १.१.१.७ 'उच्चैर् निगदेन' इति अनूद्यते । २.१.३७

उच्चैर् निरुक्तं अभिष्टुयात् । शांखायन ब्रा ८.३

उच्चैर् निविदम् । आश्वश्रौ ५.९.१२

उच्चैस्त्वेन उत्तमेन अनुयाजेन यजति । शांखायन ब्रा १.५

मैसं ३.६.५ उच्चैः प्रवर्ग्येण । ३.३.९ तं. प्रवर्ग्यसाम्नां पुनः 'उच्चैः प्रवर्ग्येण-सामत्वाद् उच्चैः ।'

मैसं ३.६.५ उच्चैः साम्ना क्रियते । ३.३.४

उच्चैः सूक्तवाकशंयुवाकौ आह । शांखायन ब्रा १.५

तैब्रा १.७.८ मैसं १.८.५ उच्छिनष्टि = न सर्वं जुहोति । ३.५.१५ उच्छेषणेन जुहोति । मैसं–हुत्वा उच्छिंषति ।

तैब्रा ३.६.१.१ उच्छ्रयणं यूपधर्मः । १२.२.२७-२९ न्यामा 'उच्छ्रयस्व वनस्पते'

तैब्रा ३.६.१.१ 'उच्छ्रयस्व वनस्पते, वर्ष्मन् पृथिव्या अधि । सुमिती मीयमानः वर्चोधा

ऋ ३.८.३ यज्ञवाहसे ॥' इति मन्त्रं होता उच्छ्रीयमाणाय पठति । १२.३.२६-३८, न्यामा

तैसं १.६.४ उज्जितिं अनूज्जेषम् । (अग्न्यादीनां) ९.१.४

शत ५.२.२.१७ उज्जितीर् यजमानं वाचयति । ३.८.१८

पाम १.१.१.३७	उत त्वः पश्यन् न ददर्श वाचं, उत त्वः शृण्वन् न शृणोत्येनाम् ।
ऋ १०.७१.४	उतो त्वस्मै तन्वं विसस्रे, जायेव पत्य उशती सुवासाः ॥ १.३.२४ तं.
मैसं ३.१०.५	उत यत् सुन्वन्ति सामिधेनीस्तदन्वाहुः । ३.७.१५,१६ आसाद्य वै हविः सामिधेनीस्तदन्वाहुः । सामिधेनीस्तदन्वाहुः इति हविर्धानयोर् वचनात् सामिधेनीनाम् ।
आप ८.२.११	उत्करे वाजिनं आसादयन्ति । १०.३.१८-२२ न्यामा
तैसं २.६.१	उत्तमप्रयाजस्य संस्कारकर्मत्वम् । १०.१.१४ न्यामा
शत १.४.४.२२	उत्तमः प्रयाजः – स्वाहाकारं यजति । १०.१.१४; ४.१.१८
सत्या १.१.२०	उत्तरयोः पवमानयोः साम्नां आगमः । ५.३.१३ (सू. १०.५.१६ – आगमेन वा अभ्यासस्य अश्रुतित्वात् –) स्तोमाभ्यासे सामानि ।
शत ११.२.३.१३	उत्तरवेद्यां अग्निनिधानम् । ७.३.२५ तद् यद् एतौ अग्नी आहवनीयाद् विह्रियते पूर्वो अध्वर्युः उत्तरवेद्यां अग्निं प्रतिष्ठापयति, जघन्यः प्रतिप्रस्थाता दक्षिणस्याम् ।
तैब्रा १.६.५.१	उत्तरस्यां वेद्यां अन्यानि हवींषि आसादयति । ३.७.२; १२.१.९
तैब्रा ३.२.३.७	उत्तराः दोहयति । ११.१.४८ तिस्रो दोहयित्वा उत्तराः (सर्वाः) गाः दोहयति ।
तैसं २.६.६	उत्तरार्धात् सकृद् अवद्यति । ११.१.३६ सकृदिव हि रुद्रे उत्तरार्धाद् अवद्यति ।
आप २.२०.३	उत्तरार्धात् स्विष्टकृते समवद्यति । ३.५.१, ४.१.२८, ११.१.३६ स्विष्टकृति च उत्तरार्धाद् सकृद् अवद्यति ।
आप २.२०.३	उत्तरार्धात् स्विष्टकृद् अवदातव्यम् । ३.५.१७ जुह्वां उपस्तीर्य सर्वेषां हविषां उत्तरार्धात् सकृत् सकृत्, स्विष्टकृते अवद्यति ।
आप २.२०.३	उत्तरार्धाद् अवदेयम् । ४.१.२८
शत १२.८.१.१३	उत्तरेऽग्नौ पयोग्रहान् जुह्वति, दक्षिणेऽग्नौ सुराग्रहान् । ३.५.१४
शत २.५.२.१८	उत्तरे विहारे हवींषि आसादयति । ११.२.३५ स सर्वाणि एव हवींषि अध्वर्युः उत्तरस्यां वेदौ आसादयति ।
तैसं ७.१.४.	'उत्तरे षोडशी' इति अनूद्यते । १०.५.५४ षोडश्युत्तरे ।
तैसं ७.१.४	उत्तरेऽहन् द्विरात्रस्य गृह्यते । १०.५.५४ षोडश्युत्तरे ।
आप ११.७.६	उत्ताना वै देवगवा वहन्ति । १.३.३०
भर १३.१७.१३	उत्तिष्ठन् अन्वाह । ३.२.१० स्तुते उत्तिष्ठन् अन्वाह ।
तैसं १.६.१	उत्पवनविलापनग्रहणसादनादयः आज्यधर्माः । ३.१.७
तैब्रा ३.२.३.६,७	उत्सृष्टवाग् अनन्वारभ्य उत्तरा दोहयति । ११.१.४७,४८ (विसृष्टवाग्)
तैसं ६.१.५	उदयनीयं क्रतुं प्रायणीयस्य निष्कासे हविष्यं निर्वपति । ११.२.६७ प्रायणीयस्य निष्कासे उदयनीयं निर्वपति ।
तैसं ६.१.५	उदयनीयं निर्वपति । ११.२.६७
तैसं ७.३.३	उदयनीयोऽतिरात्रः ८.२.२४
आयुर्वेद	उदरामये पयः पातव्यम् । ७.१.८
शत ४.५.१.१३	उदवसाय यजेरन् । १०.२.४२,४३ उदवसानीयेन यजते ।
तैसं ५.६.१	'उदानिषुर् महीर्' इति तस्माद् उदकं उच्यते । २.१.३३ न्यामा

तैब्रा २.१.१०.१० उदितहोमे व्यतिक्रमे व्युद्धे च केचित् प्रायश्चित्तं आमनन्ति । २.४.८.२२ उदितहोमस्या (अग्निहोत्रे) पि प्रायश्चित्ताम्नानाद् व्युष्यता गम्यते अनुदितहोमस्यापि । उदिते होष्यामि इति प्रक्रान्ते, अन्यथा क्रियमाणे भवति तत्र प्रायश्चित्तस्य विषयो भविष्यति इति कर्मैकत्वेऽपि न दोषः । २.४.२३

तैब्रा ३.८.१६ उदिते जुहोति । ५.१.३३ उदिते सूर्ये प्रातर् जुहोति ।

मैसं ३.६.१ उदीचीं असुराः । ३.४.१० इमां (उदीचीं) असुराः ।

तैसं ६.१.१ उदीचीं रुद्राः । ३.४.१०

तैसं १.२.८; २.२.१२ ऋ १.५०.१ उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ ८.१.३१ सौर्ये अनुवाक्या ।

शत १४.१.१.३३ उद्गाता आत्मने वा यजमानाय वा यं कामं कामयते तं उद्गायति । ३.८.१४

तैसं ६.४.११ उद्गातारं वृणीते । ३.७.२४ त्रिर् हिं करोति उद्गातॄन् एव वृणीते ।

शत १.५.२.१३ 'उद्गातारो नाप व्याहरेयुः ओत्तमायाः (आ + उत्तमाया) एषा' इत्येव उद्गातारो होत्रे यज्ञं प्रयच्छति (ते+३.५.२६ 'उत्तमायां एषा उत्तमा' इति अपसुब्रह्मण्यानां एव)

पा ५.१.१२९ उद्गातुः कर्म औद्गात्रम् ३.३.१३ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्यः अञ् । अध्वर्युः उन्नेता प्रतिहर्ता होता)

तैसं ७.५.८ उद्गातोद् गायति । ३.७.२२

पा ५.१.१२९ उद्गात्रादिभ्यः अञ् । ३.३.१३ औद्गात्रम्

तैसं ३.२.९ 'उद्गीथ एव उद्गातॄणां, ऋचः प्रणव उक्थ्यशंसिनां, प्रतिगरोऽध्वर्यूणां' इति समाख्याकृतभेदः । ३.७.४३

तां १३.१२.१४ उद्गीथा वा एतर्हि वाग्भवति, यर्हि पृष्ठ्यः षडहः संतिष्ठते, न बहु वदेत, नान्यं पृच्छेत्, नान्यस्मै ब्रूयात्, संस्थिते षडहे मधु, आशयेत, घृतं वा । ९.२.४०

जैब्रा १.१७५ 'उद्गेय मा इरा चा दाक्षासा' इति इरागानम् । ९.१.५६ सू-गानसंयोगात् । 'ओ यिरा यिरा चा दाक्षासा' जैब्रा

तैसं १.३.१ 'उद्दिवं स्तभानाऽन्तरिक्षं पृण, पृथिवीं दृंह ।' इति यूपस्य उच्छ्रयणे करणभूत एष मन्त्रः । १२.३.३६-३८ न्यामा

तां १९.७.३ उद्भिदा यजेत (पशुकामः) । १.४.१, ४; ११.१.२४

तैब्रा ३.७.६.२२ उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य । हरिमाणं च नाशय । ६.१.२४ न्यामा

तैसं ३.१.१ 'उन्दन्तीर् ओजो धत्त' अभिवृष्टस्य मन्त्रः । ११.४.५० उन्दन्तीर् बलं धत्त, ओजो धत्त, बलं धत्त, मामे दीक्षां मा तपो निर्वधिष्ट' इत्याह, एतद् एव सर्वं आत्मन् धत्ते, नास्यौजो बलं न दीक्षां न तपो निर्घ्नन्ति ।

भर १३.२६.९ उन्नेता चमसान् उन्नयति । ३.७.२२ यत्र क्व च चमसान् उन्नयेत्, उन्नेता उन्नयेत् ।

निरु १.१ उपक्रमप्रभृति अपवर्गं (समाप्ति) पर्यन्तं यजते ६.२.१३

पा १.३,२५,२२.१२ उपग्रहविशेषात् मन्त्रकरणे उपतिष्ठतेर् आत्मनेपदम् । ७.३.३६ उपान् मन्त्रकरणे २५, स्थः २२, आत्मनेपदम् १२

तैत्रा ३ ६.६.१ उपनयत मेध्या दुर् आशासाना मेधपतिभ्यां मेधम्। ९.१.४५

गौतम ध. १.२.१०-१४ उपनयनादि नियमः ६.२.२१-२२ न्यामा ब्रह्मचर्यं, अग्नीन्धनं, भैक्षचरणं, सत्यवचनं, अपां उपस्पर्शनम्। गुर्वनुगमनं, अभिवादनं, श्रौताध्ययनादयो ब्रह्मचर्यं च। (वर्जयेत् मधुमांसगन्धमाल्यादि।)

आश्वगृ १.४.४ उपनयने तिसृभिर् जुहुयात्। ६.८.११

मनु २.१४० उपनीय तु यः शिष्यं, वेदं अध्यापयेद् द्विजः। साङ्गं च सरहस्यं च, तं आचार्यं प्रचक्षते। १.३.१३ तं

तैब्रा ३.३.५.५ उपभृति द्वे चतुर् गृहीते प्रयाजानुयाजार्थे। ४.१.४० तं अष्टौ उपभृति। यदु-पभृति प्रयाजानुयाजेभ्यस्तत् ।

काठक सं १२.९ उपयामगृहीतोऽसि अच्छिद्राय त्वां अच्छिद्रेण आश्विनं ग्रहं गृह्णाति। गृहीत्वाऽऽसादयति। ८.२.४

तैसं १.३.२ उपरवमन्त्रः – रक्षोहणो बलगहनो वैष्णवान् खनामि। ११.४.५२ उपरिबिलाद् गृह्णाति। ३.४.११

बौधा ध. २.३.३९ उपरि वाससोऽपि कार्ये परिधत्ते। १०.४.१४ उत्तरं वासः कर्तव्यं पञ्चस्वेतेषु कर्मसु। स्वाध्यायोत्सर्गदानेषु, भोजनाचमनयोस्तथा ॥

तां १६.५.१४ उपवतीं रथन्तरपृष्ठस्य प्रतिपदं कुर्यात्। १०.५.५९

साम १५७० उपवती प्रतिपद्-उप त्वा जामयो गिरो देदिशतीर् हविष्कृतः। वायोरनीके अस्थिरन् ॥

तैसं २.५.११ उपवीतं देवानां उपव्ययते। ३.४.७

सत्या ३.४.३९ उपवीता वा एतस्य अग्नयः भवन्ति यस्य अग्न्याधेये ब्रह्मा सामानि गायति।

सत्या ३.४.४९ १०.८.९; २.१.३३ सूत्रं–उपवादश्च तद्वत्। न पर्युदासः, ब्रह्मणो अप्राप्त-त्वाद्, असतो वचनं अर्थवादार्थं भवति । ब्रह्मा ब्राह्मणवाचित्वाद् उद्गात्रविधानं भविष्यति। प्रतिषिद्धानि एकेषां अग्न्याधेये सामानि।

आप १.६.६ उपवेषं करोति। ४.२.८ मूलतः शाखां परिवास्य उपवेषं करोति।

शत १.२.१.३ उपवेषेण कपालानि उपदधाति। १०.८.६८ स यः कपालानि उपदधाति स उपवेषं आदत्ते।

तैसं २.५.११ उपव्ययते देवलक्ष्मं एव तत् कुरुते। ३.१-२१

शत ३.७.२.१ उपशये यूपशब्दः। १.४.१० उपशयो यूपो भवति।

शत ३.७.२.१ उपशयो यूपो भवति। ७.३.३३

तैसं ६.६.८ उपष्टम्भनं वा एतद् यज्ञस्य, यद् अति ग्राह्याश्चके, यत् पृष्ठे अतिगृह्णीयात् प्राञ्चं यज्ञं पृष्ठानि संगृह्णीयुः, यद् उक्थ्ये अतिगृह्णीयात् । प्रत्यञ्चं यज्ञं अतिग्राह्याः संगृणीयुः। १०.८.२३ (उपस्तम्भनम्)

तैब्रा २.१.५ ८ उपसदोऽपि विधीयन्ते अग्निहोत्रस्य–'उन्नीय उपसादयति, पृथिवीं एव प्रीणाति, ह्रोष्यन् उपसादयति, अन्तरिक्षं एव प्रीणाति, हुत्वा उपसादयति दिवं एव प्रीणाति, एता वा अग्निहोत्रस्य उपसदः।

शत ११ २.७.२७ उपसदो विधीयन्ते दर्शपूर्णमासयोः। २.३.२४ एता ह वै दर्शपूर्णमासयोर् उपसदो यद् अनुयाजाः तस्मात् ते उपसद्रूपेण प्रत्यञ्चो हूयन्ते।

तां. २५.४.१ — उपसद्भिश्चरित्वा, इति हि उक्त्वा इदं अभिधीयते 'न च उपसदोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च सन्ति।' २.३.२४

पा ६.३.१२२ — उपसर्गस्य घञि अमनुष्ये बहुलम्। ९.२.२५ न्यामा उपसर्गस्य घञन्ते उत्तरपदे अमनुष्ये अभिधेये बहुलं (अणो) दीर्घम्। अभित्वर्तसाम-अभीवर्तं, नीक्लेदः, वीमार्गः, अपामार्गः प्रासादः, प्राकारः। (निषादो मनुष्यः)

तैसं २.६.३ — उपस्तृणन्, अभिघारयन्, आज्यस्य यजन्। ३.५.६ तं. तस्माद् यजन्ति आज्यभागौ उपस्तृणन्ति अभिघारयन्ति।

ऐब्रा २.१४ — उपस्तृणाति आज्यं, हिरण्यशकलं, वपा, हिरण्यशकलं ततो अभिघारयति। ४.१.३०

सत्या १७.४.४ — उपहव्योऽनिरुक्त उक्थ्यो यज्ञो बृहत्सामा अश्वः श्वेतो रुक्मललाटो दक्षिणा। (परेषां श्रूयते)

उपहव्योऽनिरुक्तस्तेन अभिशस्यमानं याजयेत् अग्निष्टोमो यज्ञः पंचदशस्तोमो रथन्तरसामा अश्वः श्वेतो दक्षिणा। १०.३.६५ गुणार्था वा पुनः श्रुतिः। जैसू. २.४.३० यदा बृहत्सामा रुक्मललाटो दक्षिणा। यदा रथन्तरसामा अश्वः श्वेतो दक्षिणा।

तां. १८.१.३, १०,१,१८,२०,२१,२२ — उपहव्योऽनिरुक्तस्तेन अभिशस्यमानं याजयेद्, उक्थ्यो यज्ञः सप्तदशस्तोमा बृहत्पृष्ठोऽश्वः श्यावो रुक्मललाटो दक्षिणा, स हि अनिरुक्तः स ब्रह्मणे देयः। १०.३.६५

सत्या. १७.४.४ — उपहव्योऽनिरुक्तोऽग्निष्टोमो यज्ञः रथन्तरसामा अश्वः श्यावो दक्षिणा। २.४.८,२८,२९

तैब्रा ३.५.८.१ — उपहूतं रथन्तरं सह पृथिव्या। ९.१.४१ न्यामा

तैब्रा ३.५.१३.३ — उपहूता मनुष्या ये यज्ञपतिं वर्धयेयुः। ९.१.४०

मैसं १.१०.१३ — उपात्र वपन्ति। ७.३.२५

पा. १.३.२५, २२,१२ — उपान् मन्त्रकरणे तिष्ठतेर् आत्मनेपदम्। ७.३.३५-३६ न्यामा स्थः

तैसं ६.४.५ — उपांशु ग्रहः प्रथमः, अन्तर्यामी ग्रहो द्वितीयः, ऐन्द्रवायवस्तृतीयः, मैत्रावरुणश्चतुर्थः। १०.५.६२-६४ न्यामा

आप २.१८.२३ — उपांशु पौर्णमास्यां यजन् २.२.११ उपांशुयाजः पौर्णमास्यां एव भवति।

मैसं ३.६.५ — उपांशु यजुषा क्रियते। २.१.३८

तैसं २.६.६ — उपांशुयाजं अन्तरा यजति। २.२.९.१०; १०.८.४७,५६,६२ ६६.

बौधा १.१६.१७ — उपांशुयाजः पौर्णमास्यां अमावास्यायामपि इज्यते। ६.५.१०-११ न्यामा आश्वश्रौ। १.३.१२,१३ शांखाश्रौ १.३

भर १३.१८.३.४ — 'उपावर्तध्वम्' इति दर्भाभ्यां स्तोत्रं उपाकरोति। १०.४.१/३

तां ६.९.१ — 'उपास्मै गायता नरः' इति ग्रामकामाय प्रतिपदं कुर्यात्। ३.३.१९;८.१.२३

साम ६५१ ऋ ९.११.१ — उपास्मै गायता नरः, पवमानायेन्दवे। अभि देवाँ इयक्षते। ३.३.१९; ८.१.२३

तैसं ६.५.२ — उपोप्ते अन्ये ग्रहाः साद्यन्ते, अनुपोप्ते ध्रुवाः। ३.६.३०

पा २.३.६६ — उभयप्राप्तौ च कर्मणि। ३.४.१३ तं. कर्तृकर्म च उभयप्राप्तौ कर्मणि एव षष्ठी स्यात्।

तैब्रा ३.७.१७, तैसं ३.७.१ — उभयमिति नित्यानुवादः एकस्मिन् अपि आर्ते अपरस्मिन् अपि, तस्मादुक्तं 'यस्य उभयं हविर् आर्तिमार्च्छेत्।' ६.४.२३

तैसं ४.१.९ शत ६.६.१.१४,१५	उभयीर् जुहोति आग्निकीश्च आध्वरिकीश्च । १०.३.२८ 'आकूतिं अग्निं प्रयुजं' इत्याद्याः षट् प्राकृत्यः आग्निक्यः । 'आकूत्यै प्रयुजे अग्नये' इत्याद्याः षट् वैकृत्यः आध्वरिक्यः आहुतयः । पश्चाद् अध्वरस्य जुहोति तानि उभयानि द्वादश । तैसं १.२.२
आप ५.२८.१९; ५.२९.१	उभयीर् ददाति (दक्षिणाः) अग्न्याधेयिकीश्च पुनराधेयिकीश्च । १०.३.३०,३२
तैसं ३.७.१	उभे अपि बृहद्रथन्तरे भवतः । ७.३.१०
तां १९.८.३	उभे बृहद्रथन्तरे कुर्यात् । ९.२.४९; १०.५.५९; १०.६.२५; १२.३.१३
आप १.२५.३	'उरु ते यज्ञपतिः प्रथतां' इति पुरोडाशं प्रथयति । १२.३.३१-३५ न्यामा
आप १.२५.३	'उरु प्रथस्व' इति पुरोडाशं प्रथयति । १२.३.३१-३५
आप १.२५.३	'उरु प्रथस्व उरु ते यज्ञपतिः प्रथतां' इति पुरोडाशं प्रथयन् सर्वाणि कपालानि प्रथयति । अभिप्रथयति
तैसं ६.२.७	'उरु प्रथस्व उरु ते यज्ञपतिः प्रथतां' इत्याह यजमानं एव प्रजाः पशुभिः प्रथयति । १.२.४३
मैसं ४.१.९	'उरु प्रथा उरु ते यज्ञपतिः प्रथतां' इति पुरोडाशं प्रथयति । १२.३.३१
शत १.२.२.८	'उरु प्रथा उरु प्रथस्व' इति पुरोडाशं प्रथयति, यज्ञपतिं एव तत् प्रथयति । १.२.३१; १.२.४३
माश्रौ १.२.३.२३ वाराह १.३.१.२२	'उरु प्रथा उरु प्रथस्व' इति पुरोडाशं प्रथयति 'सं ते तन्वा तनूः सृज्यताम्' इति त्रिः परिमार्ष्टि । १०.१.५५
ऋ १.२४.८	उरुं हि राजा वरुणश्चकार, सूर्याय पन्थामन्वेतवा उ । अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥ ९.४.२२
तैसं १.३.४	उरु विष्णो वि क्रमस्व, उरु क्षयाय नः कृधि । घृतं घृतयोने पिब, प्रप्र यज्ञपतिं तिर । ९.४.२३
तैब्रा ३.६.६.३,४	उरूकं मन्यमाना वनिष्ठुं अस्य मा राविष्ट । ९.४.२२ न्यामा वनिष्ठुं अस्य मा राविष्ट । (३) उरूकं मन्यमानाः
तां १६.१३.६	उर्वरा वेदिर् भवति । १०.१.९ न्यामा (साद्यस्क्रे)
तैसं १.१.९	उर्वी चासि वस्वी चासि । १.४.१ न्यामा
शत ११.५.१.१	उलपराजिं स्तृणाति । ३.१.२४ (वेद्यां आस्तरितुं संपादितः स्तम्बः–उलपराजिः ।)
शत २.२.२.१	उलूखलमुसलाभ्यां अवहन्ति । ३.१.११ उलूखलमुसलाभ्यां दृशदुपलाभ्यां अवघ्नन्ति ।
ऋ १०.३६.१	उषासानक्ता बृहती सुपेशसा, द्यावाक्षामा वरुणो मित्रो अर्यमा । इन्द्रं हुवे मरुतः पर्वतान् अपः, आदित्यान् द्यावापृथिवी अपः स्वः ॥ १०.१.३३
काठक सं २०.१५	उषासानक्ता अग्ने आज्यस्य वीताम् । १०.१.३३ (एकादशप्रयाजानां) अभ्यस्यमानानां अन्या अन्या देवताः दुरउषासानक्तादयः ।
तैसं २.४.११	उष्णिक् ककुभौ धाय्ये । ५.३.५

तां ८.५.२ उष्णिहि सफं ककुभि पौष्कलं द्वे अपि एकैकस्यां ऋचि। ९.२.२५/३,२८/३ उष्णिहि पौष्कलं-इन्द्रमच्छ सुता (६९४) ककुभि सफं (६९२) पवस्व-मधुमत्तमम्। ते द्वे उष्णिक् ककुभौ सा एका जगती।

सफं साम ५७८ पवस्व मधुमत्तम इन्द्राय सोमक्रतुवित्तमोमदः। महि द्युक्षतमोमदः॥ ककुभि सफं

साम ५९६ उष्णिहि पौष्कलं-इन्द्रमच्छ सुता इमे, वृषणं यन्तु हरयः। श्रुष्टे जातास इन्दवः स्वर्विदः। उष्णिहि पौष्कलम्

निघण्टु २.११ 'उस्रा, उस्रिया, मही, मही, अदितिः, इला, अघ्न्या, जगती, शक्वरी' इति गोर् नव नामानि। १०.४.३२

वाराह ३.३.४.२२ 'उस्रायै वपायै मेदसोऽनु ब्रूहि।' १०.४.३३ यथोक्तं वा, विप्रतिपत्तेर् न चोदना। 'उस्रायै' इति मन्त्राम्नानं, न वचनं कर्तव्यं इति। वाराहे-विश्वेभ्यो देवेभ्यश्छागानां उष्ट्राणां मेषाणां वपानां मेदसः।

शत ११.५.२.३,५ ऊरू वा एतौ यज्ञस्य यद् वरुणप्रघासश्च साकमेधश्च। ७.३.२४ अयमेव दक्षिणा ऊरुर् वरुणप्रघासाः (३) अयमेव उत्तरा ऊरुर् महाहविः-साकमेधाः।

मैसं १.१०.१८ (ऊरू वै देवानां याज्यानुवाक्ये) एकया प्रत्यागच्छति गमयति अन्या अथात्र (पितृयज्ञे) तिस्रः कार्याः। द्वे १२.४.४

तैसं २.१.१ ऊर्गुदुम्बरः। १.२.२१,२२ ऊर्ग् वा उदुम्बरः।

मैसं २.५.१ ऊर्जं पशून् आप्नोति। १.२.१९ आप्त्वा

आप १.१.११ 'ऊर्जे त्वा' इति अनुमार्ष्टि संनयति वा। २.१.४७ (ऊर्जे-रक्षाय वा बलाय वा, त्वां अनुमार्ष्टि-सायण)

तैसं २.१.१ ऊर्जोऽवरुध्यै। १.२.१९, २१,२५

तैसं १.१.११ 'ऊर्णाम्रदसं त्वा स्तृणामि', इति त्रिधातु पञ्चधातु वा स्तृणाति। ११.४.४४ १२.१.४४ सायण

तैब्रा ३.९.१.२ ऊर्ध्व ऊ षु ण ऊतये। तिष्ठा देवो न सविता। ऊर्ध्वो वाजस्य सनिता यदञ्जिभिः। वाघद्भिर् विह्वयामहे॥ १२.३.३६-३८ न्याया

तैब्रा ३.३.७.७ ऊर्ध्वं आघारयति। २.२.१३,१६

तां १६.५.२४ ऊर्ध्वं माध्यन्दिनपवमानात् प्राक् मैत्रावरुणसाम्नः इदं अन्तरालं पृष्ठदेशः। सूत्रं-विधेस्तु विप्रकर्षः स्यात्-एकस्य पृष्ठकार्ये विधिर् अन्येषां परिसामकार्ये-पवमाने रथन्तरं करोति, आर्भवे बृहत्, वैरूपं होतुः पृष्ठम्, वैराजं ब्रह्म साम, शाक्वरं मैत्रावरुणं साम, रैवतं अच्छावाकं साम-वैरूपस्य होतुः पृष्ठे सर्वेषां निवेशः। १०.६.१३,१४

तैसं २.६.६ ऊर्ध्वं सोमाद् द्विपुरोडाशा पौर्णमासी प्राक् सोमाद् एकपुरोडाशा। १०.८.६२ सूत्रं-द्विपुरोडाशाभ्यां उपांशुयाजः स्यात्। अन्तरार्थत्वात्। पौर्णमास्यां उपांशुयाजः। अन्तरा-द्वयोः पुरोडाशयोर् मध्ये उपांशुयाजः।

मैसं १.१.१३ ऊर्ध्वोऽध्वरो, दिविस्पृग् अह्रुतो यज्ञो यज्ञपतेर् इन्द्रवान् स्त्ववान् बृहद्भाः॥ वीहि मधोर् घृतस्य स्वाहा। (स्पृग्। इन्द्रवान्।) १०.३.१४,१६

तैब्रा ३.६.१.२ ऋ. १.३६.१४	ऊर्ध्वो नः पाह्यँसो नि केतुना। विश्वं समत्रिणं दह। कृधी न ऊर्ध्वान् च, रथाय जीवसे। विदा देवेषु नो दुवः॥ १२.३.३६-३८ न्यामा
तैब्रा ३.६.३.३	ऊवध्यगोहं पार्थिवं खनतात्। (पशुशकृद् गूह्यते संव्रियते यस्मिन् प्रदेशे स ऊवध्यगोहः।)
मैसं १.११.८	उषपुटैर् अर्पयन्ति इति अध्वर्यवो अर्पयिष्यन्ति। ३.७.५१ सूत्रं– तद्ग्रहणाद्वा स्वधर्मः स्याद् अधिकारसामर्थ्यात् सहाङ्गैः अव्यक्तः शेषे। अध्वर्यवो उषपुटान् अर्पयिष्यन्ति इति वाजपेयाङ्गेन लिङ्गेन वाजपेय आध्वर्यवः।
मैसं १.११.८	उषपुटैः अर्पयन्ति। ३.७.५१
भर ६.१५.८	ऊहश्चिकीर्षित इति ब्राह्मणं उपदिशति। चिकीर्षित इति च इष्टः उच्यते। ९.२.१,२
पाम १.१.१.१८	ऊहार्थं अपि शब्दानाम्। १.३.२४ तं। ऊहः खलु अपि... व्याकरणं अध्येयम्।
साम १४५३-५५	ऋक्तो जगदाख्यं साम स्यात् विषुवति। १०.५.५८ सूत्रं–जगत्साम्नि सामाभावाद् ऋक्तः साम तदाख्यं स्यात्। (विभ्राड् बृहत् पिबतु-साम १४५३-५५ एतदेव महादिवाकीर्त्यं साम तृचे।)
ऐब्रा ३.२.२३;१३.२३	ऋक् सामोवाच 'मिथुनी संभवाव' इति। सोऽब्रवीत् 'न वै त्वं मम अलं असि जायार्थे, वेदः मम महिमा' इति। ते द्वे भूत्वा ऊचतुः। सोऽब्रवीत् 'न युवां मम अलं स्थः जायार्थे, वेदः मम महिमा' इति। तास्तिस्रो भूत्वा ऊचुः 'मिथुनीसंभवाम' इति। तस्माद् एकं साम तृचे क्रियते स्तोत्रीयम्। ऐतरेयब्राह्मणे–ऋक्साम उपावदत् 'मिथुनं संभवाम प्रजात्यै' 'न' इत्यब्रवीत् साम। 'ज्यायान् वाऽतो मम महिमा' इति। ते द्वे भूत्वा उपावदताम्। 'न' प्रतिवचनं समवदत्। तास्तिस्रो भूत्वा उपावदन्। तत् तिसृभिः समभवत्। तस्मात् तिसृभिः स्तुवन्ति, तिसृभिर् उद्गायन्ति, तिसृभिर् हि साम संमितम्। ९.२.१६
आप ८.३.१०	ऋग्भिर् युक्तं रथं होत्रे ददाति। १०.३.७५
तैब्रा ३.१२.९.१	ऋग्भिः प्रातर् दिवि देव ईयते, यजुर्वेदेन तिष्ठति मध्ये अह्नः। सामवेदेनास्तमये महीयते, वेदैर् अशून्यैस्त्रिभिरेति सूर्यः॥ ३.३.३
छां ७.३.१	ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं, सामवेदं, अथर्ववेदं चतुर्थं; इतिहासपुराणं पञ्चमम्। १.३.७ तं
शत ८.१.३.३	ऋचं गायति। ७.२.१३ ऋचि साम गायति
तां ४.३.४,५	ऋचा स्तुवते साम्ना स्तुवते। यद् ऋचा स्तुवते तद् असुरा अन्ववायन् यत् साम्ना स्तुवते तद् असुरा नान्ववायन्। य एवं विद्वान् साम्ना स्तुवीत। ९.२.३०/१; ९.२.३१/१ (साम्ना इतो यन्ति, ऋचा पुनरायन्ति) साम वा असौ लोकः ऋग् अयं, यत् इतः साम्ना यन्ति स्वर्गं लोकं आरभ्य यन्ति, यद् ऋचा पुनरायन्ति अस्मिन् लोके प्रतितिष्ठन्ति। ऋचा वा असुरा आयन्, साम्ना देवाः – जैब्रा १.१५४ ऋचि प्रणवं दधाति याज्यावर्जम्। आप ४.१३.१२.१९

शत ८.१.३.३ ऋचि साम गायति । ९.२.४ गीयते ।

छां १.६.१ ऋच्यध्यूढं साम गायति । ३.३.९ तं

बह् ३.४.१ ऋजीषं अप्सु प्रास्यति । इति सर्वेषां अह्नां यद् ऋजीषं सर्वम् । १०.६.७३ ऋजीषं अप एव अभ्यवचयन्ति ।

बह् ३.४.१ ' ऋजीषस्य कृत्स्नस्य अप्सु प्रासनम् ' १०.६.७६ (निष्पीडितरसः सोमवल्लीभागः ऋजीषम्)

सत्या १२.८.२१,२२ ऋजीषाणां–' ऋषीणां आग्नेयेन संवत्सरं उपधाने आसीत सूक्तेन सूक्तस्य अवच्छेदाय' इति आग्नेयेन सूक्तेन इत्युक्ते यावन्ति आग्नेयानि सूक्तानि दाशतय्यानि सर्वैर् इष्टका उपधीयन्ते (यद् ऋषीणां आग्नेयसूक्तं तेन संवत्सरं चिन्वन्ति, यानि दाशतयीषु आग्नेयानि सूक्तानि तेषां एकैकेन सूक्तेन एकैकां इष्टकां उपदधाति-सत्या.)

तैसं २.५.११ ऋजुं आघारयति । २.२.१३; १२.३.९

ता १८.२.१०-१२ ऋतं वै सोमोऽनृतं पशवो यत् पशून् दद्यात् सोऽनृतं कुर्यात्, औदुम्बरः सोमचमसो दक्षिणा । १०.३.६९ जैब्रा २.१५९ (ऋतपेये) सगोत्राय ब्रह्मणे देयः । कात्या २२.८.२५ पशूपवादात्–ऋतपेये पशून् न दद्यात् । औदुम्बरचमसे सोमादयः ।

मैसं १.४.१२ ऋतवो वै प्रयाजाः समानीय होतव्याः । २.४.३१ मैत्रायणीयानां समिधादयः प्रयाजा न समाम्नायन्ते, अथ च गुणाः श्रूयन्ते ऋतवो वै प्रयाजाः ।

तैसं ३.४.७ ऋताषाड् ऋतधामा अग्निर् गंधर्वस्तस्योषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा, ताभ्यः स्वाहा । राष्ट्रभृन्मन्त्राः । ३.४.३१–३३ न्यामा

तैसं ७.४.८ ऋतुमुखं वा एषा पौर्णमासी संवत्सरस्य या चैत्री पौर्णमासी । ६.५.३१ मुखं वा एतत् संवत्सरस्य यत् चित्रापूर्णमासः ।

तैसं ७.२.१० ऋतुयाज्यावरणं आत्रेयहिरण्यदानं च द्वादशाहस्य केचिद् धर्माः । १०.२.६२ ऋत्विगाचार्यौ नातिचरितव्यौ । १०.२.४६; ११.३.३३ इति स्मरन्ति ।

पा ३.२.५९ ऋत्विग्दधृक्, ऋतुशब्द उपपदे यजेः क्विन्–निपातनात् । ३.७.३३ तं

मैसं ४.८.३ ऋत्विग्भ्यो दक्षिणां ददाति । ३.७.३३,३६; १०.२.२२,२३; १०.३.५७

तैसं ६,२.२ ऋत्विग्याज्ययोश्च अव्यभिचारो धर्मः । ११.४.५ स निर्ऋच्छाद् यो नः प्रथमो अन्यो अन्यस्मै द्रुह्याद् इति तस्माद् यः स तानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिं आर्च्छति ।

तां ५.५.६ ऋत्विज उपगायन्ति । ८.१.१८

कात्या १३.२.२ ऋत्विज उपवसन्ति । ३.७.३३; १०.६.५४

तैसं ६.२.२ ऋत्विजां यजमानस्य च परस्परं अव्यभिचारार्थं कर्मारम्भे शपथकर्म तानूनप्त्रं नाम । १.३.३ तं यस्तानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिं आर्च्छति ।

तैसं ६.३.७ ऋत्विजो वृणीते, छन्दांसि एव वृणीते, सप्त वृणीते, होतारं, अग्नीध्रं, अध्वर्युं, मैत्रावरुणं, ब्राह्मणाच्छंसिनम् । १.३.१३

तां २३.१.५ ऋद्धिकामाः सत्रं आसीरन् । १०.२.४३ त्रयोदशरात्रं (सत्रं) ऋद्धिकामा उपेयुः ।

तैसं ५.५.२	ऋध्नोत्येव । २.३.२१ तं य एवं विद्वान् अग्निं चिनुते ऋध्नोत्येव ।
तैब्रा १.१.४.८	'ऋभूणां त्वा' इति रथकारस्य आधानमन्त्रः । ६.१.५० ऋभूणां त्वा देवानां व्रतपते व्रतं आदधीत ।
तैब्रा ३.७.५.१२	ऋषभं वाजिनं वयं पूर्णमासं यजामहे । ९.२.५४ ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः । लक्षणेन तु सिद्धानां अन्तं यान्ति विपश्चितः । २.१.३२
तैसं ७.२.१०	एक एव यजेत । १०.६.४८ सत्रं अपोद्य अन्यस्य एककर्तृकतां विदधत् बहुकर्तृकतां गमयति ।
तैब्रा १.६.३.७	एककपालं जुहोति । २.१.११ एककपालं आहवनीये जुहोति ।
तैब्रा १.६.३.६,७	एककपालं सर्वहुतं करोति । १.४.२३
मैसं १.१०.२०	एककपालान् जुहोति । ४.३.२७ तं एककपाला भवन्ति । (त्र्यम्बकेषु)
तैसं २.३.२	एकधा ब्रह्मणे परिहरति । १०.२.१७ उपहरति (सह उपहरति)
तैब्रा ३.६.६.२	एकधाऽस्य त्वचं आच्छयतात् । ९.३.२९,३०
आप २.१६.७	एकं वृणीते । ६.१.४३ न्यामा एकस्य गोत्रप्रवर्तकस्य नामोच्चरणकर्तृकं-यथा कश्यपगोत्रोऽहं, भरद्वाजगोत्रोऽहम् ।
आप २.१६.८	एकं वृणीते. द्वौ वृणीते, त्रीन् वृणीते, न चतुरो वृणीते, न पञ्चाति वृणीते । ६.१.४३
ऐब्रा ३.२३	एकं साम तृचे क्रियते । ९.२.१४ तिसृभिर् ऋग्भिः साम संमितम् । तस्मादेकं...
मैसं ३.९.८	एकं हि वृणीते । ६.१.४३
तैसं ७.३.२	एकं हि द्वादशाहे त्रिवृदहः । ६.७.४०
ऋ ८.७७.४	एकया प्रतिधापिबत्, साकं सरांसि त्रिंशतम् । इन्द्रः सोमस्य काणुका ॥ ९.१.६
तैसं ४.३.१०	'एकयाऽस्तुवत' इत्यत्र या असृष्टयः (इष्टकाः) ताः लक्षयेत् । १.४.२७
तैसं ५.३.४	(सृष्टीर् उपदधाति) १.४.२७
मैसं ३.४.८	एकयूपे एकादशपशवो नियुज्यन्ते । ४ ४.२८; २.४.२६ नियुज्याः एकयूपे एकादशपशवो यदा नियुज्यन्ते तदा एकस्यैव पशोः (स्वरुणा) समञ्जनं पूर्वस्मिन् पक्षे, सर्वेषां (पशूनां समञ्जनं) सिद्धान्ते । श्लोकश्च भवति– स्वरुर् यूपाङ्गमिति चेत् एकस्यैव समञ्जनम् । बहूनां एकयूपत्वे सर्वेषां तु समञ्जनम् । ४.४.२८
तैब्रा ३.८.१९.१	एकयूपो वा एकादशिनी वा अन्येषां यज्ञानां यूपा भवन्ति, एकविंशिनी अश्वमेधस्य । ५.२.७-९ न्यामा
शुयस २.२१,२२	एकरुद्रदेवत्ये एको रुद्रः, शतरुद्रदेवत्ये शतं रुद्राः । १.२.४७ असंख्याता बहुरुद्रदेवत्याः । (शुक्लयजुः सर्वानुक्रमसूत्रे रुद्राध्याये ।)
तैसं २.५.१०	एकविंशति सामिधेनीर् अनुब्रूयात् प्रतिष्ठाकामस्य । ५.३.४; १०.५.२७ तत्र एकादश पठिताः (तैब्रा ३.५.२) पुनः त्रिः प्रथमां त्रिः उत्तमाम् (तैसं २.५.७) इति आवृत्त्या पञ्चदश 'समिध्यमानवती च समिद्धवती च तयोर् द्वे ऋचे धाय्ये'–'पृथुपाजा', 'तं संबाधम्' निवेशितव्ये एवं सप्तदश, तथा अन्ये चतस्रो ऋचो ग्राह्याः ।

तैसं ६.१.१ एकविंशत्या पावयति (दर्भपिञ्जुलैः) ५.२.५

तैसं ७.२.१ एकविंशत्रिणव त्रयस्त्रिंशत् स्तोमाः–विवृद्धस्तोमाः। १०.५.१५,१६ सूत्रे–आगमेन (संख्यापूरणं) अभ्यासस्य अश्रुतित्वात्। १०.५.१५-२५ न्यामा

ला २.१०.१८टीका एकविंशं यज्ञायज्ञीयम्। ५.३.३८; ९.२.२८/३ तत्र पूर्वा बृहती, उत्तरा विष्टारपङ्क्तिः, ततः ककुभौ उत्तरे कृत्वा (ला. अभ्यासेन) प्रगाथः क्रियते।

तैसं ६.६.११ 'एकविंशं (षोडशि) स्तोत्रं भवति प्रतिष्ठित्यै हरिवच्छस्यते' इति षोडशिनि स्तुतशस्त्रे विहिते। १०.५.४९-५२ न्यामा

तां १२.१३.८ एकविंशस्तोमत्वाद् उक्थ्यग्रह इव षोडशी। १०.५.४८

एकविंशायतनो वा एष यत् षोडशी।

वाराह ३.२.१.४६ एकविंशः षोडशी वैराजसामा, सामत्वाद् वैराजपृष्ठोऽपि। ३.८.४४

तैसं ७.२.१ एकविंशेन अतिरात्रेण प्रजाकामं याजयेत। (प्रतिष्ठाकामं) ५.१.१३; ५.३.७; १०.५.१५,१६ बहिष्पवमाने त्रयस्तृचाः – नवस्तोत्रीयाः, तत्र चत्वारस्तृचाः आगमयितव्याः।

पा १.२.३३ एकश्रुति दूरात् सम्बुद्धौ। १२.३.२३,२४

पा १.४.२२ एकस्मिन् एकवचनं द्वयोर् द्विवचनं बहुषु बहुवचनम्। ३.४.१३

मैसं ३.४.८ एकस्मिन् यूपे एकादश पशवो नियोक्तव्याः। २.४.२६; ४.४.२८

एकयूपे एकादश पशवो नियुज्यन्ते।

वारागृ १.२.१.१ एकस्मै वा अन्या इष्टयः कामाय आह्रियन्ते, सर्वेभ्यो दर्शपूर्णमासौ-सर्वकामस्य दर्शपूर्णमासौ। ४.३.२५

तां ६.२.१.२ एकस्मै वा अन्ये क्रतवः कामाय आह्रियन्ते, सर्वेभ्यो ज्योतिष्टोमः। ४.३.२५

तैसं ६.१.६ एकहायनी (अजा) सोमक्रयार्था। ९.१.४२

तैसं ६.१.६ एकहायन्या क्रीणाति। ४.१.२५

पाम ६.१.८.४ एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुक् भवति।

शत ४.१५.१०.६ एकां गां दद्यात् (सोमापहृते) ४.१.१५

मैसं ३.२.२ एका जगती द्वे गायत्र्यौ। ८.३.१४ ये हि द्वे गायत्र्यौ सा एका जगती।

तैसं ६.२.३ एकाद्यो दीक्षा ज्योतिष्टोमस्य। १.१.१ न्यामा आवाग्रं अवान्तरदीक्षां उपेयात् यः कामयेत् अस्मिन् मे लोकेऽर्धुकं स्यात् इति। एकं अग्रे अथ द्वौ अथ त्रीन् अथ चतुर् एवा वा आग्राऽवान्तरदीक्षाऽस्मिन् एव अस्मै लोकेऽर्धुके भवति॥

तैसं २.२.४ मैसं २.१.४ एकादशकपालं निर्वपति, अष्टाकपालं द्विर् अवद्यति, त्रिर् अभ्यङ्क्ते, एकविंशत्या पावयति इति संख्यादीनां गुणत्वं भवति। २.५.५ सूत्रे-सर्वाणि

शत २.५.३.१०

आप १०.६.२८ ऐब्रा १.३.३ तु एककार्यत्वात् एषां तद्गुणत्वात्।

तैब्रा ३.५.२ एकादश च समाम्नाता सामिधेन्यः। १०.५.२७

तैसं २.५.७ त्रिः प्रथमां आह त्रिरुत्तमाम्।

मैसं ३.१०.४ एकादश प्रयाजा एकादशानुयाजी एकादशोपयजस् तत् त्रयस्त्रिंशत्। त्रयस्त्रिंशद् देवताः।

तैसं ६.३.७ एकादश प्रयाजान् यजति। ५.३.१; ८.१.१२; १०.३.१,७ स च प्रयाजान् द्विर् आवृत्य पञ्चमं प्रयाजं सकृद् पुनः आवर्तते।

तैसं ६.३.१०	एकादशभिर् अवदानैर् असौ यागो निर्वर्तयितव्यः । २.२.२१ एकादश अवदानानि अवद्यति ।
वाराह ३.२.७.१	एकादशयूपान् छिनत्ति । १० २.२६ एकादशिन्यां प्रतिपद्य यूपं छिनत्ति ।
तैसं ७.२.६	एकादशरात्रेण यजेत् । १०.५.१
मैसं ३.१०.३	एकादश वा एतानि पशोर् अवदानानि । १०.७.४
तैसं ६.३.११	एकादशानुयाजान् यजति । ५.३.१;८.१.१२;१०.३.१
वाराह ३.२.३.४१	एकादशिनान् प्रायणीयोदयनीययोर् अतिरात्रयोर् आलभेरन् । १०.६.६-१२ न्यामा अपि वा प्रायणीयोदयनीययोर् विभक्तान् ऐकादशिनान् आलभेरन् ।
वाराह ३.२.३.४५	एकादशिन्यां अन्वहं एकैकां आलभेत । १०.६.९ तान् अन्वहं विहृतान् आलभन्ते ।
आप १०.१५.१	एका दीक्षा तिस्र उपसदः, पञ्चमीं प्रसुतः । १२.२.२५ प्रसुतः सोमयागः ।
वाराह १.४.३.४१	एका देया, षड् देया, द्वादश देयाः, चतुर्विंशतिर् देया, शतं देयं, सहस्रं देयं, अपरिमितं देयाः (गावः) गवां शतं ६.७.२१; १०.३.३०; ११.१.४३
काठक सं १२.११	एका पुरोरुक्, एका याज्या । ८.२.४
शत २.६.१.२१	एकां सामिधेनीं अन्वाह । १०.५.१ एकां एव होता सामिधेनीं अन्वाह ।
ऋ १०.१६.१२	उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि । उशन्नु शत आ वह पितॄन् हविषे अत्तवे ॥ एका सामिधेनी ।
सत्या २१.२.३३	एकारस्य योनौ आईभावः । ९.२.३२ यत्र एतद् एकार-ऐकारौ याज्यान्ते भवतः, तत्र 'आई'कारं कुर्यात् ।
सत्या १.६.२०	एकार्थास्तु विकल्पेरन् । १२.३.१०,२९ पुरोडाशविभागार्थाः-पूषा वां विभजतु । भगो वां विभजतु । अर्यमा वां विभजतु । जैसू १२.३.२९ मन्त्राणां संनिपातित्वाद् एकार्थानां विकल्पः स्यात् ।
तां १६.५.१२	पावमान उत्तमस्तृचो भवति ।
सोमपावमानसाम ७८७	एका वा अस्योत्तमा स्तोत्रीया, तां उद्गृह्य उद्गायेत् । ९.२.१८ (उद्गीथ-भेदं दर्शयति) पवमानस्य ते वयं पवित्रमभ्युन्दतः । सखित्वमावृणीमहे ॥ ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया । तेभिर् नः सोम मृडया ॥ साम ७८९-स नः पुनान आभर, रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः ॥
तैसं ७.४.८	एकाष्टकायां दीक्षेरन् । एषा वै संवत्सरस्य पत्नी यद् एकाष्टका । ६.५.३५
तां १६.१.८	एकाहाद् वा ज्योतिष्टोमाद् (स्तोत्रीयाणां) उपचयः (शतोक्थ्ये, शतातिरात्रादिषु) स्यात् । ८.३.११-सूत्रम्- एकाहाद् वा- एकाहे हिंकरणं नास्ति । एकाहे अहिंकृता गायति । (जैब्रा १.३१५)
तां १६.५.२४टीका	एकाहो विश्वजित् षडहः (षाडहिकानां पृष्ठानां भावात् 'एकाहो विश्वजित् षडहः' इत्युक्तं, तं एकाहं षडहं इति आचक्षते । ७.४.१३
काठ ३४.९	एको द्वौ बहवोऽपि वा अहीनैर् यजेरन् तान् अदीक्षिता याजयेयुः । ३.३.१७; ८.२.२४ सूत्रं-द्वित्वबहुत्वयुक्तं चोदनात्
शत १.५.४.७	एको मम । २.१.३२; ५.१.३ स इन्द्रोऽब्रवीत् 'एको मम' अस्माकं 'एका' इति अपरे अब्रुवन् ।

तां १६.५.१२ एका वा अस्योत्तमा स्तोत्रीया उद्गृह्य उद्गायेत । ९.२.१८–पवमान उत्तमस्तृचो भवति–पवमानसाम–७८७–७८९

साम ७८७, ऋ ९.६१.४
साम ७८८, ऋ ९.६२.५
साम ७८९, ऋ ९.६३.६ पवमानस्य ते वयं, पवित्रमभ्युन्दतः । सखित्वमा वृणीमहे ॥ ये ते पवित्र-मूर्मयोऽभिक्षरन्ति धारया । तेभिर् नः सोम मृडय ॥ स नः पुनान आभर, रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः ॥ ९.२.१८

तैसं १.८.६ एको रुद्रो न द्वितीयोऽवतस्थे । १.२.३६ एक एव रुद्रो न द्वितीयाय तस्थे ।

तैसं ५.६.२ एतत् खलु साक्षात् अन्नं य एष चरुः, य एनं चरुं उपदधाति । ९.४.५१

तैउ ३.१० एतत् साम गायन् आस्ते । २.१.३७ न्यामा हा ३ वु हा ३ वु हा ३ वु, अहं

तैआ ९.१.४,५ अन्नं, अहं अन्नं, अहं अन्नं । अहं अन्नादो, अहं अन्नादो, अहं अन्नादः । अहं श्लोककृत्, अहं श्लोककृत्, अहंश्लोककृत् । अहमस्मि प्रथमजा ऋता ३ स्य...

ऐब्रा १८.१५ एतद् द्वादशाहिकं अहर् ज्योतिराख्यं आयुराख्यं वा । ७.४.१३ ज्योतिर् गौर् आयुर् इति, आयुर् गौर् गवा ज्योतिः च साकमेधे श्रूयते ।

तैब्रा १.६.७.५ एतद् ब्राह्मण एककपालः । ७.१.२३ वैश्वकर्मण एककपालो भवति ।

एतद् ब्राह्मण ऐन्द्राग्नः, एतद् ब्राह्मण एककपालो यद् ब्राह्मण इतर इतरश्च सूत्रम्–एककपालैन्द्राग्नौ च तद्वत् । ७.१.२२

तैब्रा १.६.७.५ एतद् ब्राह्मण ऐन्द्राग्नः । ७.१.२२

तैब्रा १.६.७.५ एतद् ब्राह्मणानि एव पञ्च हवींषि, यद् ब्राह्मणानि इतराणि । ७.१.१७

मैसं ४.५.६ एतद् वाऽध्वर्योः स्वं यद् आश्रावयति । ३.७.४२

ऐब्रा २.२ एतद् वै दैव्यं मधु यद् घृतम् । १.३.३० आज्यम्

तैसं ६.२.६ एतद् वै प्रतिष्ठितं देवयजनं यत् सर्वतः समम् । ४.२.६ (समे दर्शपूर्ण-मासाभ्यां यजेत)

मैसं ३.७.४ एतद् वै सर्वदैवतं वासो यत् क्षौमम् । १.४.२९

मैसं २.२.४ एतया निषादस्थपतिं याजयेत् । ६.१.५१; ६.८.२०–२१ लौकिकाग्नौ । वास्तुमध्ये रौद्रं चरुं निर्वपेत् । वास्त्वमयं रौद्रं चरुं निर्वपेत् यत्र रुद्रः प्रजाः शमायेत, वास्तोर् वै वास्त्वं जातं, वास्त्वमयं खलु वै रुद्रस्य, स्वेनैव एनं भागधेयेन शमयति, एतया निषादस्थपतिं याजयेत् । कूटं दक्षिणा कर्णौ वा गर्दभः ।

शांखा ब्रा १८.१४ एतया पुनराधेयसंमितया इष्ट्वा अग्निहोत्रं होतव्यम् । ६.५.४२ संस्थिते हि अग्न्याधेये अग्निहोत्रं हूयते ।

तैसं १.६.११ एतया वै दैव्या देवा असुरान् अदभ्नुवन्, तया एव भ्रातृव्यं दभ्नोति । ३.३.१२ न्यामा

मैसं ४.४.९ एतयैव अन्नाद्यकामं याजयेत् । ११.४.९ 'अथैतां दिशां अवेष्टयः, इमं वा अथ तं लोकं उपावरोहन्ति, अवेष्टिः' इति च एकवत् श्रुतेः । एतया ।

तां १६.१.३.४ 'एतस्माद् यज्ञाद् अन्ये यज्ञक्रतवो विह्रियन्ते, यो वै त्रिवृदन्यं यज्ञक्रतुं आपद्यते, स तं दीपयति, यः पञ्चदशं स तं, यः सप्तदशं स तं, य एकविंशं स तं' इति एवं आहुर् एको यज्ञः । ५.३.४०

तैब्रा ३.८.१६.४ एतस्मिन् काले जुहोति ७.३.४ उदिते जुहोति, अनुदिते जुहोति ।

शत ३.६.२.१२ एतस्य खादिर एव (यूपः) कार्यः (वाजपेयस्य) । १२.३.१४

तां १७.७.१	एतस्यैव (त्रिवृदग्निष्टुदग्निष्टोमस्य एव) रेवतीषु वारवन्तीयं अग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत । २.२.२७
शत ४.५.८.१०	एतानि ते नामानि १०.३.४९ एता ते अघ्न्ये नामानि इडे रन्ते...
तैसं ३.१.६	एतानि पात्राणि–युनज्मि ते पृथिवीं ज्योतिषा सह इति ध्रुवां अभिमृशति, युनज्मि वायुं अन्तरिक्षेण ते सह इति उपभृतं, वाचं सह दिवा सूर्येण इति जुहूम् ।
तैसं १.६.८	एतानि वै दशयज्ञायुधानि । ३.१.११ स्फ्यश्चकपालानिच ... ।
तैसं २.६.१०	एतावता ह एनसा वियुक्तो भवति । ३.४.२४; ४.१.३–अयुक्तो ६.२.२० अयुक्तः । एतावता ह एनसा (शंयुवाके) भवति ।
आश्व ४.१.६	एतावतो वृणीते । ३.७.२२ (तान् पुरो अध्वर्युर् विभजति) (षोडश ऋत्विजः)
तां ६.९.१३	"एते असृग्रमिन्दवः" इति बहुभ्यः प्रतिपदं कुर्यात् । ३.३.१७; ६.२.३
साम ८३० ऋ ९.६२.१	एते असृग्रमिन्दवस्तिरः पवित्रमाशवः । विश्वान्यभि सौभगा ॥ ३.३.१७; ९.३.१५
सत्या १७.४.३८	एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम् । ३.३.१७; ६.१.२२; १०.२.४१
तां १६.८.१,३	एतेन सहस्रदक्षिणेन यजेत । २.२.२२ ज्योतिः, सर्वज्योतिः, विश्वज्योतिः, साहस्राख्यं च चत्वार एकाहाः ।
तां १६.१.२	एतेनानिष्ट्वा । (एतेन अनिष्ट्वा) ५.३ ३७-३८ न्यामा
तां १९.१४.३	एतेनैव त्रीन् याजयेत् । ३.३.१७ तं मरुत्स्तोमेन ।
तां १९.१५.२	एतेनैव द्वौ याजयेत् । ३.३.१७ तं
ऋ १०.९४.२	एते वदन्ति शतवत् सहस्रवत् अभिक्रन्दन्ति हरितेभिरासभिः । विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया, होतुश्चित् पूर्वे हविरद्यमाशत ॥ ३.५.३७; ९.१.९
तैसं ३.४.६	एतेषां राष्ट्रभृतो जुहोति, अभ्यातानां जुहोति । ७.१.१२ एतान् (राष्ट्रभृतो) जुहुयात्, अभ्यातानैर् भ्रातृव्यान् अभ्यातनुते ।
तैसं ३.४ ११	एन्द्र सानसिं रयिं, सजित्वानं सदासहम् । वर्षिष्ठमूतये भर ॥ (इन्द्रदेवतायाः याज्या) २.१.१९
तैसं ३.४.११	(पुरोनुवाक्ये) प्र ससाहिषे पुरुहूत शत्रून्, ज्येष्ठस्ते शुष्म इह रातिरस्तु । इन्द्राऽऽभर दक्षिणेना वसूनि, पतिः सिन्धूनां असि रेवतीनाम् ॥ २.१.१९
पा ३.३.५६	एरच् । २.१.१ तं इकारान्तात् धातोः भावे अकर्तरि च कारके संज्ञायां अच् प्रत्ययः, चि–चय, जि–जय, क्षि–क्षय, भी–भय ।
ऐब्रा ४.१६	एवंकामाः सत्रं उपेयुः । ६.२.१ अन्नाद्यकामाः सत्रं आसत ।
मनु ३.९३	एवं यः सर्वभूतानि, ब्राह्मणो नित्यमर्चति । स गच्छति परमं स्थानं तेजोमूर्तिः पथर्जुना ॥ ३.१.१३ तं
शत ४.१.१.१४	एवंविद् उद्गाता आत्मने वा यजमानाय वा यं कामं कामयते तं उद्गायति । ३.८.१३-१४ न्यामा

तैआ २.१०.१२ एवं विद्वान् स्वाध्यायं अधीयीत। (स्वाध्यायं अधीयीत) यद् ऋचोऽधीते, यद् यजूंषि, यत् सामानि, यद् ब्राह्मणानि, यद् इतिहासपुराणानि, यत् कल्पान्। १.३.११ तं

मैसं १.६.३ एवं सपत्नं भ्रातृव्यं अवर्तिं सहते। य एवं विद्वान् अग्निं आधत्ते। २.३.४ तं

मैसं ३.९.४ 'एष ते वायो' इति ब्रूयात् (यदि एकं यूपं उपस्पृशेत्) ९.३.८

तां १६.१.२ एष वाव प्रथमो यज्ञो यज्ञानां यज् ज्योतिष्टोमो, य एतेन अनिष्ट्वा अथ अन्येन यजेत गर्तपत्यं एव तत् प्र वा मीयते। २.४.८; ३.३.३२;५.३.३७ तत् जायते प्र वा

तैसं ७.२.१० एष वै कुणपं अत्ति यः सत्रे प्रतिगृह्णाति, एक एव यजेत। १०.६.४८ एष वै दर्शपूर्णमासयोर् अवभृथः। ७.३.१२,१४ प्राच्यां दिशि देवा ऋत्विजो मार्जयन्ति–

तैसं १.७.५ एष वै दर्शपूर्णमासयोर् अवभृथः। (एतत् तु यथा 'अयं आम्रो यज्ञदत्तस्य पुत्रः' इति।)

तैब्रा २.६.२.१ एष वै दशमस्य अह्नो विसर्गो यन् मानसम्। (विसर्गः=अन्तः) १०.६.३९ अन्तो वा एष यज्ञस्य।

तैसं २.५.६ एष वै देवरथो यद् दर्शपूर्णमासौ, यद् दर्शपूर्णमासौ इष्ट्वा सोमेन यजते रथस्पष्ट एवावसाने वरे देवानां अवस्यति। ४.३.३७; ५.४.५

मैसं १.४.११ एष वै प्रजापतिः सप्तदशो यज्ञेषु अन्वायत्तः। १०.८.१

तैसं ३.३.४ एष ह वै हविषा हविर् यजते योऽदाभ्यं गृहीत्वा सोमाय यजते, परा वा एतस्य आयुः प्राण एति योंऽशुं गृह्णाति। (ज्योतिष्टोमे) २.३.२०; ५.३.१५,१६ जुहोति।

तैसं ५.५.१ एषा वा अग्नेः प्रिया तनूर् यद् वैश्वानरः प्रियां एव अस्य तनुं अव रुन्धे। ४.४.१२

काठक सं ९.१५ एषा वा अनाहिताग्नेर् इष्टिर् यच् चतुर्होतारः। ६.८.२.३; ६,७.८,९ अनुवादे आहिताग्नेः विधिपक्षे अनाहिताग्नेः।

तैसं १.७.३ एषा वै दर्शपूर्णमासयोर् दक्षिणा। ३.४.४९ यद् अन्वाहार्यं आहरति अथो दक्षिणा एव अस्य एषः।

तां १७.१.१३ एषा वै प्रतिष्ठिता बृहती या पुनःपदा। तद् यत् पादं पुनरारभते तस्माद् वत्सो मातरं अभि हिंकरोति। ९.२.२८/१ पुत्रो मातरं अध्येति (प्रगाथे पादः पुनर् गृह्यते)

तैसं ७.४.८ 'एषा वै संवत्सरस्य पत्नी यद् एकाष्टका' इत्युक्त्वा पुनः चतुरहे पुरस्तात् पौर्णमास्यां दीक्षेरन् तेषां एकाष्टकायां क्रयः संपद्यते तेन एकाष्टकां न छंबट् कुर्वन्ति। ६.५.३५

भर १२.१६.६ एषोऽत ऊर्ध्वं गार्हपत्यो भवति (एष शालामुखीयः अग्निः) १२.१.१२

मैसं ४.६.६ एषोऽसि, त्वेषोऽसि। १२.४.१ इषोऽसि, त्वेषोऽसि।

तैसं ३.२.५ एहि वसो पुरोवसो प्रियो मे हृदोऽसि। अश्विनोस्त्वा बाहुभ्यां सघ्यासम्। नृचक्षसं त्वा देव सोम सुचक्ष अवख्येषम्। ३.२.२५,२६;१०.५.८८

शत ३.९.१.६-२१	ऐकादशिना आवर्तन्ते (दण्डकलितवत्)-वारुणं अन्ततः पुनः पर्यावृत्तेषु आग्नेयं एव प्रथमेऽहनि आलभेत...आग्नेयं प्रथमं पशुं आलभते ६, अथ सारस्वतं ७, अथ सौम्यं ८,९, अथ पौष्णं १०, अथ बार्हस्पत्यं ११,१२, वैश्वदेवं १३,१४, ऐन्द्रं १५,१६, मारुतं १७,१८, ऐन्द्राग्नं १९ सावित्रं २०, वारुणं अन्ततः २१, एवं एव सर्वत्र सदा क्रमः स्यात् । १०.५.८७
वाराह ३.२.३.४१, ४५	ऐकादशिनान् प्रायणीयोदयनीययोर् आलभेरन् । १०.६.६,७ न्यामा अन्वहं एकैकं आलभेत । ८,९,१० (प्रायणीये पञ्च, उदयनीये षड् ।)
तैसं ६.६.४	ऐकादशिनेषु सौत्यस्य द्वैरशन्यस्य दर्शनात्–सूत्रं–८.१.१४ आग्निष्ठाद् द्वे द्वे रशने आदाय द्वाभ्यां रशनाभ्यां एकैकं यूपं परिव्ययति–
तैसं ६.२.५	ऐकाहिकं ह्युपसत्त्वं स्यात् । ७.४.१४ तिस्र एव साह्नस्य उपसदः ।
कात्या ५.५.२१,२२	ऐडानि अवदेयानि । ५.२.११ सौविष्टकृतानि अवदाय नैव जुहोति ऐडानि अवदेयानि ।
मैसं ४.३.८	ऐन्द्रं एकादशकपालो राज्ञो गृहे । ११.२.१३
तैसं २.५.४	ऐन्द्रं दधि अमावास्यायाम् । २.२.३; ३.६.२९
तैसं २.२.१	ऐन्द्रं एकादशकपालं निर्वपेद् आग्नेयवत् । ८.१.३२ आग्नेयविधिना । सूत्रं-विप्रतिपत्तौ हविषा नियम्येत ।
तैसं २.२.१	ऐन्द्रं एकादशकपालं निर्वपेत् प्रजाकामः । १०.५.५८; ८.१.३२
तैब्रा ३.७.१.८	ऐन्द्रं पञ्चशरावम् । ६.४.२८-२९ न्यामा
तैब्रा ३.७.४.२	ऐन्द्रं पयः । ८.१.१२ अव्यक्तासु तु सोमस्य (विधिः) ८.१.१६ देवतायाः अनिर्देशः अव्यक्तं ... ऐन्द्रं पयः शांखा ५.४
तैसं ६.४ ८	ऐन्द्रवायवं गृहीत्वा मैत्रावरुणं गृह्णाति । तस्माद् ऐन्द्रवायवः पूर्वो मैत्रा-वरुणाद् गृह्यते ।
तैसं ७.२ ८	ऐन्द्रवायवं गृह्णाति । २.२.१७,१८; ३.५.९; १०.७.२; १०.४.३ ऐन्द्र-वायवग्रहणं चोदितम् । ऐन्द्रवायवो गृह्यते ।
तैसं ७.२.७	ऐन्द्रवायवं अग्रं कुर्यात् १०.५.६२ ऐन्द्रवायवाग्रं गृह्णीयात ।
वाराह ३.२.२.३९	ऐन्द्रवायवस्य वा एतद् आयतनं यद् चतुर्थं अहः । १०.५.८० समूढे एव ।
मैसं ४.६.२	ऐन्द्रवायवोऽपि अपूर्वः सोऽपि पयसा श्रपयितव्यः प्राप्नोति । (अपूर्वः मैत्रा-वरुणवत्) अपूर्वो हि ऐन्द्रवायवः तस्माद् अपूर्वत्वात् व्यवस्था स्यात्–सूत्रं–९ १.१४ (ऐन्द्रवायवे पुरोडाशं आदधाति मैसं ४.६.२)
तैसं ६.४.७	ऐन्द्रवायवाग्रं गृह्णाति । १०.५.६२ ऐन्द्रवायवाग्रा ग्रहा गृह्यन्ते ।
तैसं ७.२.८	ऐन्द्रवायवाग्रं प्रथमं अहः अथ शुक्राग्रम् । १०.५.८३
तैसं ६.४.७	ऐन्द्रवायवाग्रा ग्रहा गृह्यन्ते । १०.५ ६२-६४ न्यामा
तैसं ७.२.७	ऐन्द्रवायवाग्रान् कुर्यात् । १०.५.६२ ऐन्द्रवायवाग्रान् गृह्णीयात् ।
तैसं ७.२.७	ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् यः कामयेत यथापूर्वं प्रजाः कल्पेरन् । १०.५.६५
वाराह ३.२.२.४०	ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथैतरेषां दशानां अह्नां ऐन्द्रवायवाग्रं प्रथमं अहः, अथ शुक्राग्रं, अथ द्वे आग्रयणाग्रे, अथ ऐन्द्रवायवाग्रं, अथ द्वे शुक्राग्रे, अथ आग्रयणाग्रं, अथ द्वे ऐन्द्रवायवाग्रे । १०.५.७९,८८

वाराह ३.२.२.३९ ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, दशमं च अहः (ऐं.) अथ इतरेषां नवानां अह्नां ऐन्द्रवायवाग्रं प्रथमं अहः, अथ शुक्राग्रं, अथ आग्रयणाग्रं, अथ ऐन्द्रवायवाग्रं, अथ शुक्राग्रं, अथ आग्रयणाग्रम् । अथ ऐन्द्रावायवाग्रं, अथ शुक्राग्रं, अथ आग्रयणाग्रम् । १०.५.७७, ७९,८०

शांखा ब्रा १४.२ ऐन्द्रवायवाद्या ग्रहाः प्रातःसवने दश आम्नाताः ३.६.३० (ग्रहधर्माश्च अन्यत्र)

तैब्रा १.८.५.६ ऐन्द्रवायवाद्या ग्रहाः प्रातःसवने तद्वत् माध्यन्दिनसवने तृतीयसवने च ग्रहाम्नानम् । ३.६.३०

तैब्रा १.८.६.३ ऐन्द्रवारुणसावित्राः पुरोडाशाः आश्विनसारस्वतसुत्रामदेवताकेषु पशुषु नोत्कृष्यन्ते, संस्कारपक्षे उत्कृष्येरन् । (पुरोडाशनान् एव पशुः) छिद्रापिधानार्थीयाश्च उक्तं अर्थवादत्वम् । १०.१.२२

शत ४.२.५.१४ ऐन्द्रः षोडशिनि तृतीयः । ३.६.४५

तैसं ६.४.४ ऐन्द्रः सोमो गृह्यते मीयते च । ३.२.२८,३८ इन्द्राय इन्द्राय त्वा इति मिमीते इन्द्राय हि सोम आह्रियते ।

शत ४.२.५.१४ ऐन्द्राग्नः उक्थ्ये द्वितीयः । ३.६.४५

तैब्रा १.६.७.५ ऐन्द्राग्न एककपालः । ७.१.२२ एककपाल ऐन्द्राग्नौ च तद्वत् (यद्वत् पञ्च सञ्चराणि)

तैसं १.८.४ ऐन्द्राग्न एकादशकपालः, इन्द्राय वृत्रघ्ने चरुः, वैश्वकर्मण एककपालः । ७.१.२२

मैसं २.१.१ ऐन्द्राग्नं कर्म वियातसजातस्य–ऐन्द्राग्नं एकादशकपालं निर्वपेद् यस्य सजाता वीयायुः । तत्र ऐन्द्राग्नस्य याज्यानुवाक्या । ३.३.१२

मैसं ४.१०.१०० इन्द्राग्नी रोचना दिवः, परिवाजेषु भूषथः । तद्वाञ्चेति प्रवीर्यम् ॥

मैसं ४.१०.१०१ प्र पृथिव्या रिरिचाथे दिवश्च । प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा, प्रेन्द्राग्नी विश्वा भुवनात्ययो प्र चर्षणिभ्यः पृतना हवेषु ॥ ३.३.१२

मैसं २.१.१ ऐद्राग्नं कर्म भ्रातृव्यवतः – ऐन्द्राग्नं एकादशकपालं निर्वपेद् भ्रातृव्यवान् । ३.३.१२

मैसं ४.१०.१२५ऋ ३.१२.६ इन्द्राग्नी नवतिं पुरो, दासपत्नीर् अधूनुतम् । साकमेकेन कर्मणा ॥

तैसं १.१.१४ मैसं ४.१०.१२६ ऋ ६.६०.१ श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् । इरज्यन्ता वसव्यस्य भूरेः, सहस्तमा सहसा वाजयन्ता ॥ ३.३.१२

तैसं ४.२.११ ऋ ८.९३.७ मैसं ४.१०.१२७ तमिन्द्रं वाजयामसि ।

तैसं ६.५.४ ऐन्द्राग्नं (ग्रहं) गृह्णाति । ३.२.४० ऐन्द्राग्नं ऋतुपात्रेण गृह्णाति ।

शत ४.२.५.१४ ऐन्द्राग्नं द्वितीयं उक्थ्ये, ऐन्द्रं वृष्णि तृतीयं षोडशिनि । ३.६.४२

तैसं २.२.१ ऐन्द्राग्नं एकादशकपालं निर्वपेत् प्रजाकामः । २.३.२५; ४.३.२७/२; ५.४.२२; ६.३.८; ८.१.११; ९.३.१; १०.७.५८; ११.१.१८

मैसं २.१.१ ऐन्द्राग्नं एकादशकपालं निर्वपेत् भ्रातृव्यवान् । ३.२.२०; ३.३.१२

मैसं २.१.१ ऐन्द्राग्नं एकादशकपालं निर्वपेत् यस्य सजाता वीयायुः । ३.२.२०; ३.३.१२

मैसं ३.९.५ ऐन्द्राग्नः पशुः उक्थ्ये आलभ्यः, ऐन्द्राग्नानि हि उक्थ्यानि । ३.६.१८

शत १.६.४.३	ऐन्द्राग्नो द्वादशकपालः पुरोडाशो भवति। ८.१.११ दर्शपूर्णमासविध्यन्तः।
मैसं १.१०.१	ऐन्द्राग्नो द्वादशकपालो मारुत्यामिक्षा। ७.१.२२ वरुणप्रघासेषु (एकादश-कपालः तैसं १.८.३)
तैसं १.८.८	ऐन्द्रापौष्णं चरुम्। २.१.१७ तं राजसूये। द्विदेवतत्वसामान्यत्वेन अग्नीषो-मीयविध्यन्तः।
तैब्रा ३.८.२३.२	ऐन्द्रो राजन्यः। १.४.२४
मैसं ३.९.५	ऐन्द्रो वृष्णिः षोडशिनि आलभ्यः, ऐन्द्रो हि वृष्णिः, ऐन्द्रः षोडशी। ३.६.१८; ९.१.४५
मैसं ३.२.४	ऐन्द्र्या गार्हपत्यं उपतिष्ठते। ३.२.३; ३.३.११,१४
अवभृथसाम १८१३-१८१५ ऋ १.१२७.१,२,३	ऐन्द्र्या अवभृथसाम गायति (क्वचिद् भवतिवचनम्) शीतकर्मा हि इन्द्रः। ९.४.३४ तस्मात् 'तपति' स्तोमो न स्यात्।
तैसं ३.१.६	ऐन्द्र्या सदो, वैष्णव्या हविर्धानम्। ३.२.२१
ऋ ३.६.९	ऐभिरग्ने सरथं याह्यर्वाङ् नानास्थं वा विभवो ह्यश्वाः। पत्नीवतस्त्रिंशतं त्रींश्च देवान्, अनुष्वधमावह मादयस्व॥ ३.२.३७ (एभिर् अग्ने आयाहि)
तां ८.६.१०	ऐरं कृत्वा उद्गेयम्। (आयीरायी) ९.१.५३
तां ८.६.१०	ऐरवत्। १२.३.२०
तैसं १.८.१	ऐष्टिकेषु अनुमत्यादिषु। १०.१.५ अनुमत्यै पुरोडाशं अष्टाकपालं निर्वपति।
आर्षेय ब्रा २.६.६	'ओ ओ हो हायी' इति स्तोमो वामदेव्यसाम्नः 'कयानश्चित्र' इति योनौ द्वयोर् अर्धयोर्मध्ये 'कयाशयि वार्तो हायि।' ९.२.३४-३८ न्यामा
साम ४४८ आर्षेय ४.११.२	ओग्नायी। ९.२.३९
तैब्रा १.१.९.८	ओदनं पचति। ५.१.२
शत २.४.३.१३	ओदनं पचेत्। ७.४.१ ओदनं अन्वाहार्यपचने पचेयुः, तं ब्राह्मणा अश्नीयुः।
आप ८.१०.७	ओदनान् उद्धरति। ११.१.४६ यावतो यजमानस्य अमात्याः (सहचराः) तावतो ओदनान् उद्धरति।
शत ४.४.२.१	ओदने हि चरुशब्दः प्रसिद्धः, आ हिमवतः आ च कुमारीभ्यः। १०.१.४२ ओदनो हि चरुः, ओदनो हि प्रत्यक्षं अन्नम्।
जैब्रा १.१७५	ओ यिरा यिरा चा दाक्षसा। ९.१.५७ इरागानम्।
मैसं १.४.११	ओ श्रावय इति चतुरक्षरं, अस्तु श्रौषट् इति चतुरक्षरं, यज इति द्व्यक्षरं, ये यजामहे इति पञ्चाक्षरं, द्व्यक्षरो वषट्कारः। एष वै प्रजापतिः सप्तदशो यज्ञे अन्वायत्तः। १०.८.१
मैसं १.१०.७	ओषधिषु एव पशून् प्रतिष्ठापयति, वृष्ट्यैव पशून् अभिजिघ्रति। १०.४.५७
तैसं १.२.१	ओषधे त्रायस्व एनम्। १.२.३५,४६
आप १६.२६.२	औदुम्बरं उलूखलं सर्वौषधस्य पूरयित्वा अवहन्ति। (सकृत) ११.१.२८
तां १८.३.१०-१२ जैब्रा २.१५९	औदुम्बरः सोमचमसो दक्षिणा सप्रियाय सगोत्राय ब्रह्मणे देयः। १०.३.६८,७२
तैसं ६.२.१०	औदुम्बरीसंमानम्। १०.२.४७ यजमानेन संमिता औदुम्बरी भवति।
ला २.६.२	औदुम्बरीं स्पृष्ट्वा उद्गायेत। १.३.३

ला २.६.२	औदुम्बरीं स्पृष्ट्वा अनपाश्रित उद्गाता उद्गायेत। ९.२.११
तैसं २.१.१ मैसं २.५.१	औदुम्बरो यूपो भवति, ऊर्ग्वा उदुम्बरः, ऊर्क् पशवः ऊर्जैवास्मा ऊर्जं पशून् आप्नोति। ऊर्जोऽवरुध्यै। १.२.१९
ला २.६.२	औदुम्बर्याः सर्ववेष्टनं। श्वोभूते सुत्येऽहनि उद्गाता तां औदुम्बरीं ऊर्ध्वाग्रैः कुशैर् वेष्टयित्वा एवंजातीयेनैव वसनेन प्रदक्षिणं ऊर्ध्वदशेन परिवेष्ट्य स्पृष्ट्वा अनपाश्रित उद्गायेत।
	औद्गात्रं उद्गात्रा। (आध्वर्यवं अध्वर्युणा, हौत्रं होत्रा) ३.७.४० सूत्रं
पा ५.१.१२९	विशिष्टपुरुषसंयोगात् कर्मणो व्यवस्था स्यात् संयोगस्य अर्थवत्त्वात्। प्राणभृज् जातिवयोवचनोद्गात्रादिभ्यो अञ् भावकर्मणोः।
कात्या २२.३.२२	औद्गात्रे समाख्यातः श्येनः। ३.७.५०,५१ सूत्रं तद्ग्रहणात् वा स्वधर्मः स्यात् अधिकारसामर्थ्यात् सहाङ्गैर् अव्यक्तः शेषे यथा श्येने 'कण्टकैर् वितुन्दन्ति' इति उद्गातारो वितोत्स्यन्ति।
तैब्रा ३.२.१.३	औपवसथ्येऽहनि शाखाहरणादीन् समामनन्ति। प्राचीं उदीचीं (शाखां) आहरन्ति। पूर्वेद्युः। ३.६.२८
तां ७.५.१९,२०	औशनं अन्त्यं त्रिष्टुप्सु। ९.२.२५/२। वायुर् वा उशनः न तस्य एतद्
७.५.१९१२	औशनं, उशना वै काव्यो असुराणां पुरोहितः आसीत्, तं देवाः कामदुघाभिर् उपामन्त्रयन्त, तस्माद् एतानि औशनानि। ९.२.२५
औशनं साम ६७७	प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष।
ऋ ९.८७.१	अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर् नयन्ति॥
साम. ६७८	स्वायुधः पवते देव इन्दुरशस्तिहा वृजना रक्षमाणः।
ऋ ९.८७.२	पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः॥
साम. ६७९	ऋषिर् विप्रः पुर एता जनानां ऋभुर् धीर उशना काव्येन।
ऋ ९.८७.३	स चिद् विवेद निहितं यदा सामपीच्यं गुह्यं नाम गोनाम्॥ ९.२.२५/२
तैसं १.३.४; १.३.५ १.१.१०	औषधधर्माः – (अवहननं, प्रोक्षणं, निर्वपनं) पूर्वं समाख्याताः, ततः आज्यधर्माः – (उत्पवनं विलापनं ग्रहणासादनम्। ३.१.७)
तैब्रा २.२.५.५	क इदं कस्मा अदात्। ३.४.२८ तं
ऋ ६.४७.१५	क ईं स्तवत् कः पृणात् को यजाते यदुग्रमिन् मघवा विश्वहावेत्। पादाविव प्रहरन् अन्यमन्यं, कृणोति पूर्वमपरं शचीभिः॥ १०.३.१५
ऋ १०.५४.३	क उ नु ते महिमनः समस्यासमत् पूर्व ऋषयोऽन्तमापुः। यन् मातरं च पितरं च साकं अजनयथास्तन्वः स्वायाः॥ १०.३.१५
तां ८.५.१	ककुभि पौष्कलं सफं उष्णिहि पौष्कलम् – सफं ९.२.२८/३ उष्णिक्ककुभौ एते भवतः (तां ८.५.१) अत्रापि 'अभ्यर्हितं' इति उष्णिक् शब्दस्य पूर्वनिपातः। अतः 'पवस्व मधुमत्तम' 'इन्द्रमच्छ सुता' इत्येते ककुबुष्णिहौ भवतः। एकं अपि एकस्यां ऋचि, अपरं अपि एकस्यां ऋचि, ते द्वे ककुबुष्णिहौ सा एका जगती।
साम ५७८ ऋ ९.१०८.१	पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः॥ ककुभि सफं
साम ५६६ ऋ ९.१०६.१	इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः। श्रुष्टे जातास इन्दवः स्वर्विदः॥

	ककुभो राजपुत्रः प्राश्नाति ध्रुवपोषः। १०.७.८ ककुभो भक्षं दर्शयति।
मैसं १.११.७	कंकचितं चिन्वीत शीर्षचितं चिन्वीत यः कामयेत सुशीर्षा अस्मिन्
काठक सं २१.४	लोके संभवेयम्। १०.८.२६
तैसं ५.४.१	कच्चित् कल्याणी दक्षिणा। १०.२.३४ श्यामा वरणकाले ऋत्विजां प्रश्नः।
आप १०.१.३	'कण्टकैर् वितुदन्ति' इति उद्गातारो वितोत्स्यन्ति। ३.७.५१ दक्षिणाकाले
कात्या २२.३.२२	कण्टकैर् एना विरूजयेयुः उद्गातारः (समाख्यया)
	कण्वरथन्तरं पृष्ठं भवति। १०.४.४३ तेजो वा एतद् रथन्तरस्य यत् कण्व-
तां १०.४.७	रथन्तरं पृष्ठम्।
साम ६८० ऋ ७.३२.२२	कण्वरथन्तरं पृष्ठं–अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य
	जगतः स्वर्दृशं ईशानमिन्द्र तस्थुषः॥ १०.४.४३
साम ६८१ ऋ ७.३२.२३	न त्वा वाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। अश्वायन्तो
	मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामाहे॥ १०.४.४३
साम ६८०,६८१	कण्वरथन्तरं स्वयोन्युत्तरयोर् गीयते। १०.४.४८ योनिः २३३/६८० उत्तरयोः
	६८०,६८१ साम्नोर् गीयते।
तां १४.३.१५	कण्वरथन्तरं भवति तत्र 'पुनानस्सोम धारया' तृचः। ६७५-६
साम कण्वरथन्तरं ६७५	पुनानः सोम धारयापो वसानो अर्षसि। आ रत्नधा योनिं ऋतस्य सीदस्युत्सो
ऋ ९.१०७.४	देवो हिरण्ययः॥
साम ६७६ ऋ ९.१०७.५	दुहान ऊधर् दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत्। आपृच्छ्यं धरुणं
	वाज्यर्षसि नृभिर् धौतो विचक्षणः॥ अत्र ५११/६७५ योनिः, ६७५,
	६७६ उत्तरयोः।
तैब्रा १.५.११.१	कतमानि वा एतानि ज्योतींषि, ये एतस्य स्तोमाः, त्रिवृत् पञ्चदश सप्तदश
	एकविंशः एतानि वा ज्योतींषि, तानि एतस्य स्तोमाः। ४.४.४०
तैसं १.४.२२	'कदाचन स्तरीरसि नेन्द्रसश्चसि दाशुषे' इति ऐन्द्र्या (गार्हपत्यं उपतिष्ठते)
	३.३.१४
तैसं ६.६.११	कनीयांसि वै देवेषु छन्दांसि आसन्, ज्यायांसि असुरेषु।
तैसं १.६.९	कपालानि उपदधाति। ५.२.४ कपालानि च उपदधाति।
तैसं २.६.३	कपाले नष्टे यजेत। ११.१.१ यदि नश्येत् आश्विनं द्विकपालं निर्वपेद् द्यावा-
	पृथिव्यं एककपालम्।
तैसं १.६.९ ब्रा ३.२.८.६	कपालेषु पुरोडाशं श्रपयति। ४.१.२६ (कपालेषु) पुरोडाशं अधिश्रयति
तैब्रा ३.२.८.६	कपालेषु श्रपयति। १.४.९; ३.१.११; ४.१.८
वासं २४.२०	कपिञ्जलान् आलभते। ११.१.३८ वसन्ताय कपिञ्जलान् आलभते।
	कपिञ्जलन्यायः। जैसू ४.१.११-१६
वाराह गृ. ६.३९	कम्बलं परिधत्ते। १०.४.१४; १२.३.२ कम्बलं ऐणेयं ब्राह्मणस्य।
बृहत्साम ६८२	कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृत॥
ऋ ४.३१.१	
साम ६८३ ऋ ४.३१.२	कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु॥
साम ६८४ ऋ ४.३१.३	अभी षु णः सखीनामविता जरितॄणाम्। शतं भवास्यूतये॥
पा २.३.१८	करणे तृतीया एव एषा। (वारवन्तीयेन) २.२.२७ तं कर्तृकरणयोस्तृतीया।

मैसं ३.१३.४ वासं २४.३ कर्णा याम्याः, अवलिप्ता रौद्राः, नभोरूपाः पार्जन्याः । ४.१.१६ यामाः
शत १३.२.३.९ ऐन्द्राग्नो दशमः । शत–ऐन्द्राग्नस्य वपायां हुतायां तदनु इतरा जुहुयुः ।

वासं२४.१०शत१३.२.५.१ कृष्णा भौमा, धूम्रा अन्तरिक्षा, बृहन्तो दिव्याः, शबला वैद्युताः, सिद्धास्तारकाः इति प्रकृत्या आह, अर्धमासानां वा एतद् रूपं यत् पञ्चदशिनः । ४.१.१६

मैसं ४.२.९ कर्तरीकर्ण्यः कर्तव्याः इति गोलक्षणानि अपि एवं एव । ४.१.३ कर्करीकर्ण्यो जमदग्नेः ।

पा ३.४.६७ कर्तरि कृत् । ३.४.१३ तं कृत्संज्ञकाः प्रत्ययाः कर्तरि कारके भवन्ति ।

पा ३.१.६८ कर्तरि शप् । ३.४.१३ कर्तृवाचिनि सार्वधातुके परतो धातोः 'शप्' प्रत्ययो भवति । पित् स्वरार्थः, शित् सार्वधातुकार्थः, 'अ' प्रत्ययः

पा १.४.४९ कर्तुर् ईप्सिततमं कर्म । २.१.१२

पा २.३.१८ कर्तृकरणयोस्तृतीया । ३.४.१३ तं

पा १.३.७२ कर्त्रभिप्राये हि कर्मफले । २.३.४ स्वरितञितः कर्त्रभिप्राये कर्मफले आत्मनेपदम् ।

पा १.३.१२,७२ कर्त्रभिप्रायं क्रियाफलं गम्यते । ३.८.४

पा २.३.२ कर्मणि द्वितीया । २.१.१२

पा ३.१.६७ कर्मणि यक् । ३.४.१३ सार्वधातुके यक् । भावकर्मवाचिनि सार्वधातुके परतो धातोर् यक् प्रत्ययो भवति ।

पा ३.२.९१; ६.१.७१ कर्मणि हि कारके चिनोतेः क्विप् प्रत्ययः स्मर्यते । १.३.३३ तं (ह्रस्वस्य पिति किति तुक्) सोमसुत् अग्निचित् प्रकृत्य ।

पा ३.२.९१,९२ कर्मण्यग्न्याख्यायां चेः क्विप् । १.३.२३तं । कर्मणि उपपदे चिनोतेः कर्मण्येव क्विप् ।

आपध २.५.११,१२,१३ कर्मप्रजासंपन्ने दारे नान्यां (जायां) कुर्वीत, अन्यतरापाये अन्यां कुर्वीत । ८.३.१८

तैसं ६.१.१०.१ कलया ते क्रीणामि (सोमं) ११.२.५९ कलया ते शफेन ते क्रीणानि ।

पा ४.२.८ कलेर् ढक् । १.३.२४ तं कालेयः (आग्नेयः–अग्नेर् ढक्)

तां ११.४ २ कवतीशब्दः ऋच एव । ७.२.२१ 'कयानश्चित्र' साम ६८२-६८४ । 'क' अक्षरयुक्ताः ऋचः

तां ११.४.२ कवतीषु रथन्तरं गायति । ७.२.१,२,३,८,९,१२,२१; ९.२.२,३२,३४ 'क' अक्षरयुक्तासु ऋक्षु रथन्तरगीत्या गायति ।

तां ११.४.२ साम ६८२.४ कवतीषु स्तुवते । २.१.२४ 'क' अक्षरयुक्तासु ६८२-६८४ गायति ।

तां १९.८.३	बृहद्रथन्तरे उभे कुर्यात् एकाहे अपचितौ। ९.२.४९; १०.६.४ बृहति बृहद्धर्मान् रथन्तरे च रथधर्मान् पृथक् पृथक् कुर्यात्। सूत्रम् –९.६.५० स्वार्थत्वाद् वा (धर्माणां) व्यवस्था स्यात् प्रकृतिवत्।
तां ६.७.१	बृहस्पतिर् वै देवानाम् उदगायत्। १.३.१३ तं.
तैसं १.१.२	बृहस्पतेर् मूर्ध्ना हरामि। १२.१.४६ बर्हिषो हरणमन्त्रः।
तैब्रा १.३.६.७,९	बृहस्पतेर् वा एतद् अन्नं यन् नीवाराः। २.३.१८
कौब्रा १०.१	बैल्वं च अन्नाद्यकामाय यूपं कुर्यात्। २.३.१८
तैसं २.१.८	बैल्वो (यूपो) ब्रह्मवर्चसकामेन कर्तव्यः। ३.६.१० बैल्वो यूपो भवति ब्रह्मवर्चसम् अवरुन्धे।
तैब्रा ३.८.१९.१	बैल्वो वा खादिरो वा पालाशो वा अन्येषां यज्ञक्रतूनां यूपा भवन्ति। १२.३.१४
आपध १.९.२६.८	ब्रह्मचर्यावकीर्णी नैर्ऋतं गर्दभम् आलभेत। ६.८.२२
आपध २.८.१८.१	ब्रह्मचारी मधुमांसं च वर्जयेत्। १०.६.३२
तैसं ६.६.१	ब्रह्मणे ददाति। ७.३.३६-३७ न्यामा. ततो ब्रह्मणे (ददाति)।
तां १८.२.१०,१२	ब्रह्मणे चमसो देयः, यः पशून् दद्यात् स ब्रह्मणे सगोत्राय। १०.३.७०
तैब्रा ३.५.८.२; १३.२	ब्रह्मदेवकृतम् उपहूतम् ९.१.४० तं.
षड् २.५.४	ब्रह्मन् उपह्वयस्व। ३.७.३८ तं.
बौधा ६.२३	'ब्रह्मवनिं त्वा क्षत्रवनिं त्वा इति प्रदक्षिणं पांसुभिः पर्यूह्य ब्रह्म दृंह क्षत्रं दृंह'
तैसं १.३.१	इति मैत्रावरुणो दण्डेन समभूमिपरिदृंहणं कृत्वा 'उत्तंभय पृथिवीम्' इति अद्भिः परिसिञ्चति, खलेवाली–यूपे यत् सार्थकम् अविरुद्धं भवेत् तत्। १०.२.७३ न्यामा.
तैसं २.३.२	ब्रह्मवर्चसकामः सौर्येण चरुणा यजेत। २.३.११-१५ न्यामा. ब्रह्मवर्चसकामः सौर्यं चरुं निर्वपेत्। ४.३.१७
तां २३.७.१	ब्रह्मवर्चस्विनो अन्नादा भवन्ति य एता (विंशतिं) रात्रीर् उपयन्ति। ४.३.१७
तैब्रा १.३.४.१,२	ब्रह्मवादिनो वदन्ति–नाग्निष्टोमो नोक्थ्यो न षोडशी नातिरात्रः, अथ कस्माद् वाजपेये सर्वे यज्ञक्रतवो अवरुध्यन्ते इति, पशुभिर् इति ब्रूयात्, यद् आग्नेयं पशुम् आलभते अग्निष्टोमम् एव तेन अवरुन्धे, ऐन्द्राग्नेन उक्थ्यम्, ऐन्द्रेण षोडशिनं, सारस्वत्या अतिरात्रं, मारुत्या बृहत्स्तोत्रम्, एतावन्तो वै यज्ञक्रतवः तान् पशुभिर् एव अवरुन्धे। १०.४.६
मैसं २.३.५	ब्रह्म वै ब्रह्मा। ब्रह्मसामकाले प्राजापत्यानां पशूनाम् आलम्भः। ४.१.३३

तां ४.३.१	ब्रह्मसाम गवामयने-अभीवर्तो ब्रह्मसाम भवति। ९.२.२५/४
साम २३६, ६८५	तं वो दस्ममृतीषहं वसोर् मन्दानमन्धसः। अभि वत्सं न स्वसरेषु धेनव
ऋ ८.८८.१	इन्द्रं गीर्भिर् नवामहे ॥
तां १३.४.१८	ब्रह्मसाम बार्हद्गिरं ब्राह्मणानां, पार्थुरश्मं राजन्यानां, रायोवाजीयं वैश्यानाम्।
साम १००२-४;१००५-७	६.६.२२
आप १८.६.७	ब्रह्मसाम्नि आलभते। ४.१.३३;११.३.५१
तैसं ५.३.१२	ब्रह्महा अश्वमेधेन यजेत। ३.४.२८ तं. तरति ब्रह्महत्यां योऽश्वमेधेन यजेत।
शत १३.३.१.१	
तैब्रा ३.७.६.१	ब्रह्माणम् एव ते समामनन्ति। ३.७.३८ तं. 'ब्रह्माणं त्वा वृणीमहे' इति ब्रह्माणं समामनन्ति।
तैब्रा ३.७.६.१	ब्रह्माणं वृणीते। ३.७.२४ ब्रह्माणं त्वा वृणीमहे।
कात्या २.१.१८	ब्रह्मा म्रियते प्रणीताप्रणयनकाले। १.२.१.३६,३९ अग्निहोत्रं हुत्वा ब्रह्माणं वृणीते।
तैसं ४.३.१०	ब्रह्मासृज्यत। १.४.२७ न्यामा.
तैब्रा १.१.२.६	ब्राह्मण आत्मार्थम् आदधीत। २.३.४ वसन्ते ब्राह्मण आदधीत। आदधीतस्य
तां १.३.७२,१२	आत्मनेपदत्वात् कर्त्रभिप्राये कर्मफलं, तस्माद् आत्मार्थम्।
तैब्रा १.१.२.६	ब्राह्मण आदधानो वसन्ते, राजन्यो ग्रीष्मे, वैश्यः शरदि। ६.१.२७
पाम १.२.६४	ब्राह्मणजातीयो न हन्तव्यः। १०.३.४०
तैसं २.६.११	ब्राह्मणं न हन्यात्। १.३.७ तं.
आपध १.१.१.१९	ब्राह्मणम् उपनयीत। ६.१.२४ तं.
तैब्रा १.८.६.२	ब्राह्मणम् परिक्रीणीयात् उच्छेषणस्य यातारम्। ३.५.१५
मैसं ४.७.६	ब्राह्मणस्य च अतिरात्रे (षोडशिनं गृह्णीयात्)। १०.५.३९,४५
काठकसं १२.११	ब्राह्मणस्य मूर्द्धनि आसादयति। १०.३.१८ ब्राह्मणस्य मूर्द्धन् सादयेत्।
काठकसं १२.१२	ब्राह्मणः सुरां न पिबेत्। १.३.७ तं.
मैसं ३.९.८	ब्राह्मणाच्छंसिनं वृणीते। ३.७.२४
ऐब्रा ६.१०	ब्राह्मणाच्छंसी इन्द्रं 'इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे' इति यजति।
तैब्रा ३.७.५.९	ब्राह्मणानाम् एव इदं हविः सौम्यानां सोमपीथानां, निर्भक्तो ब्राह्मणः न इह
मैसं १.४.१२	अब्राह्मणस्य अस्ति। १२.४.३९
ऋ ६.७५.११	ब्राह्मणासः पितरः सोम्यासः। १.३.३५. न्यामा. (आत् जसेः असुक् पा ७.१.५०)
सत्या १७.३.२३	ब्राह्मणाः संस्थापयत मे यज्ञम्। १०.२.५७ ब्राह्मणाः समापयतम् एतं यज्ञम्।
पाम १.१.१.२०	ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयः। १.३.२४ तं.
तैब्रा १.१.२.६	ब्राह्मणोऽग्निं आदधीत। ६.१.३७
तैब्रा १.१.२.६	ब्राह्मणोऽग्नीन् आदधीत। २.३.४;६.६.३१ अग्निम्।
पाम ६.१.८४	ब्राह्मणो न हन्तव्यः। १.३.७; तं. १.३.३४ तं.
निरुक्त ९.६	ब्राह्मणो ब्रवणात्। १.३.२४ तं. संवत्सरं शिशयाना ब्राह्मणा व्रतचारिणो ब्रुवाणात्।
तैब्रा १.१.२.६	ब्राह्मणो वसन्तेऽग्निम् आदधीत। ३.६.११;६.१.३७;६.२.८

मैसं २.१.४	ब्राह्मणो वसन्ते ब्रह्मवर्चसकामः अग्नीषोमीयम् एकादशकपालं निर्वपेत् श्यामाकम् । ५.४.२५
तैसं ३.२.५	भक्षमन्त्रः- भक्षेहि माऽऽविश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय वर्चसे सुप्रजास्त्वायेहि वसो पुरोवसो प्रियो मे हृदोऽसि । अश्विनोस्त्वा बाहुभ्यां सध्यासम् । नृचक्षसं त्वा देव सोम सुचक्षा अवख्येषम् । मन्द्राभिभूतिः केतुर् यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु मन्द्रा स्वर्वाच्यदितिर् अनाहतशीर्ष्णी वाग्जुषाणा सोमस्य तृप्यत्वेहि विश्वचर्षणे शंभूर् मयोभूः स्वस्ति मा हरिवर्ण प्र चर क्रत्वे दक्षाय रायस्पोषाय सुवीरतायै मा मा राजन् विबीभिषो मा मे हार्दि त्विषा वधीः । वृषणे शुष्मायाऽऽयुषे वर्चसे । वसुमद् गणस्य सोम देव ते मतिविदः प्रातःसवनस्य गायत्रछन्दसः । इन्द्रपीतस्य नराशँ-सपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि रुद्रगणस्य सोम देव ते मतिविदो माध्यन्दिनस्य सवनस्य त्रिष्टुप् छन्दस इन्द्रपीतस्य नराशꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि । आदित्यवद् गणस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दसः इन्द्रपीतस्य नराशꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि । आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियम् । भवा वाजस्य सङ्गथे ॥ हिन्व मे गात्रा हरिवो गणान् मे मा तीतृपः । शिवो मे सप्तर्षीन् उप तिष्ठस्व मा मेऽवाङ् नाभिमति गाः ॥ भक्षयन्तो म्रियेरन् (भक्षाणां बहुत्वात्) । ६.४.४ सर्वं भक्षयन्तो न समापयेयुः (अश्वमेधे) । भक्षिताप्यायितान् चमसान् दक्षिणस्यानसोऽवलम्बे सादयन्ति । ३.५.२०
तैब्रा २.८.९.८	भगं मे भक्षीत्याह । २.१.३३
सत्या १.६.२०	भगो वां विभजतु, अर्यमा वां विभजतु । २.१.४६
तैसं ३.१.१	भद्रादभिश्रेयः प्रेहि बृहस्पतिः पुर एता तेऽस्तु । ११.४.५१ दीक्षितस्य प्रस्थितस्य प्रयाणमन्त्रः ।
तां १९.८.४	भर्गयशसी भवतः । १०.४.१६
भर्गसाम ६९७ ऋ ९.१०१.१	पुरोजिती वो अन्धसः सुताय मादयित्नवे । अप श्वानँ श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥
साम ६९८ ऋ ९.१०१.२	यो धारया पावकया परि प्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः ॥
साम ६९९ ऋ ९.१०१.३	तं दुरोषमभी नरः सोमं विश्वाच्या धिया । यज्ञाय सन्त्वद्रयः ॥
यशःसाम १४११ ऋ ८.९०.५	त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः । त्वं वृत्राणि हꣳस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणी धृतिः ॥
साम १४१२ ऋ ८.९०.६	तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे । महीवकृत्तिः शरणात्त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥ १०.४.१६
पाम २.१.१. वा २.१.५१	भवन्ति वै प्रधानस्य सापेक्षस्यापि समासः । ३.४.१३ तं. २.१.१७
पाम १.१.१.३	भवन्ति हि अनर्थकानि (अर्थरहितानि) वचनानि यथा दशदाडिमानि, षडपूपाः । ३.३.१०

तैसं २.६.३ भस्मनाऽभिवासयति । ५.१.२९ न्यामा.

मैसं ३.२.२ भस्मना इष्टकाः संयुज्यात् । ३.६.३५

भर ५.१७.५ भाग्ययशःश्रीकामानां पुनरादधीत । १०.३.३ योऽग्नीन् आधाय भाग्यज्यानिं पुत्रज्यानिं जीयेत स पुनरादधीत ।

मनु ८.४१६ भार्या दासश्च पुत्रश्च निर्धनाः सर्व एव ते । यत् ते समधिगच्छन्ति यस्य ते तस्य तद् धनम् । ६.१.१२

आप ९.१३.८,९ भिन्नं कपालम् अप्सु प्रहरन्ति । ६.४.१६ अथैनद् (भिन्नं कपालं) अपोऽभ्यवहरेत् ।

शत १२.४.१.६ भिन्ने जुहोति, स्कन्ने जुहोति । ६.२.१९;६.३.७;६.४.१०;६.५.४५,४६,४७; ८.४.१०,१९;११.४.३५ भिद्येत चेत् अवपद्येत स्कन्नं वा प्रायश्चित्तेन अभिमृश्य व्याहृतिभिश्च, अद्भिर् उपनिनीय कपालानि भस्मोद्वापे वा कुर्यात् ।

ऋ १०.११६.७ भुङ्क्ते देवता – इदं हविर् मघवन् तुभ्यं रातं, प्रति सम्राळहृणानो गृभाय । तुभ्यं सुतो मघवन् तुभ्यं पक्वोऽद्धीन्द्र पिब च प्रस्थितस्य ॥

ऋ १.९५.१० विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ॥ (धन्वन्स्रोतः कृणुते गातुमूर्मिं, शुक्रैरूर्मिभिरभि नक्षति क्षाम् +)

ऋ ८.७७.४ एकया प्रतिधापिबत्, साकं सरांसि त्रिंशतम् । इन्द्रः सोमस्य काणुका ॥ ९.१.६ देवतायै प्रत्तं हविर् नीरसं भवति ।

ऋ १०.१२१.१ भूतस्य जातः पतिरेक आसीत् । १०.३.१३ (हिरण्यगर्भः समवर्तताग्रे +)

तैसं ४.३.१० भूतानि असृज्यन्त । १.४.२७ न्यामा. 'सृष्टीरुपदधाति 'तत्र मन्त्रः ।

तैसं २.१.१ भूतिकाम आलभेत (वायव्यं पशुम्) । १.२.७

तैसं ७.३.७ भूतिकामा उपेयुः । ८.२.३१ कुण्डपायिनाम् अयने पञ्चदशरात्रे य एवं विद्वांसः पञ्चदशरात्रम् आसते भ्रातृव्यान् पराभाव्य विजित्य श्रियं गच्छन्ति, पाप्मानं निर्दहन्ते, ओजो बलम् इन्द्रियम् आत्मन् धत्ते ।

तैसं २.१.१ भूतिकामो वायव्येन श्वेतेन पशुना यजेत । २.३.१२-१५ न्यामा. वायव्यं श्वेतम् आलभेत भूतिकामः ।

तैसं ६.२.८ 'भूतेभ्यस्त्वा' इति अपूर्वां स्रुचं गृह्णाति । ८.४.७ 'भूतेभ्यस्त्वा' इति स्रुचम् उद्गृह्णाति ।

तैसं ५.६.३ भूतेष्टका उपदधाति । ३.६.३५;५.३.१५,१७,२०

लाट्यायन १.७.९ भूमिगतं स्वाहाकरोति । ८.४.१५ अन्यतरां वा स्वाहाकारां द्वितीयां यथा भूमिम् आज्यं प्राप्स्यति ।

ऐब्रा ५.३२ 'भूःस्वाहा' इति गार्हपत्ये जुहुयात्, 'भुवः स्वाहा' इति दक्षिणाग्नौ, 'स्वः स्वाहा' इति आहवनीये जुहुयात्, 'भूः भुवः स्वः स्वाहा' इति आहवनीये जुहुयात् ॥

तैसं १.१.७ भृगूणाम् अङ्गिरसां धर्मस्य तपसा तप्यध्वम् । १०.१.५३

तैब्रा ३.६.१५.१ भृज्जन् इन्द्राय हरिवते धानाः पूषण्वते करम्भं, सरस्वते परिवापम्, अयं

भर १३.८.१ यजमान इन्द्राय हरिवते धानाभिः पूषण्वते करम्भेण सरस्वते परिवापेण, सूपस्था अद्य देवा वनस्पतिः । ११.३.४५

तां १६.१.११ भृतास्ते ऋत्विजः सोमार्थेन परिक्रयेण तस्य द्वादशशतं दक्षिणेति वचनेन । १२.१.३२

आपध १.११.३०.१	भोजने प्राङ्मुखता एव। ५.२.९ प्राङ्मुखो अन्नानि भुञ्जीत।
मनु ९.१८२	भ्रातॄणाम् एकजातानाम् एकश्चेत् पुत्रवान् भवेत्। सर्वे तेनैव पुत्रेण पुत्रिणो मनुरब्रवीत्। १.३.७ तं.
मैसं ३.१.९ काठकसं १९.१०	भ्राष्ट्राद् अन्नकामस्य आहृत्य अन्वादध्यात्। १२.४.१७,१९,२४ [काठकसं- (भृज्जनात्) भ्राष्ट्राद् आहरेत्।]
पिङ्गलसूत्र १.२	मकारेण अपिङ्गलस्य न सर्वगुरुस्त्रिकः प्रतीयेत। १.१.५ धी श्री स्त्री मः- त्रिगुरुं विद्धि मकारम्।
ऋ ७.१०३	मण्डूकसूक्तम् २.१.२३
तैसं ५.४.४	मण्डूकसूक्तस्य अग्नौ अर्थवत्ता। २.१.२३
तैसं ५.४.४	मण्डूकेन अग्निं विकर्षति। ९.१.२६
पा. ५.२.५९	मतौ छः सूक्तसाम्नोः। ९.१.५४-५८ न्यामा.
चरक २६.८१	मत्स्यान् न पयसा समश्नीयात्। १०.६.६६
पा. ४.३.८५	मथुरां अभिप्रस्थितो माथुरः। तद् गच्छति पथिदूतयोः अण् - माथुरः। १.३.२१ तं. प्राच्यैः दाक्षिणात्यैः उदीच्यैः। द्यु प्राच् अपाच् उदच् प्रत्यच् एतेभ्यो यत् (पा ४.२.१०१)। उद ईत् (पा ६.४.१३९)। प्राच्य उदीच्य प्रतीच्य अपाच्य दक्षिणा पश्चात् पुरसस्त्यक्। तद्धिते किता वृद्धिः दाक्षिणात्यः।
पा ४.३.४	मथुराया निर्गतः। तत आगतः–अण्–माथुरः। १.३.२१ तं
पा. ४.३.८९	मथुरायां वसन्। सोऽस्य निवासः अण् – माथुरः। १.३.२१
गौतमध २	मद्यं नित्यं ब्राह्मणो वर्जयेत्। १.३.७ तं.
तां १३.१२.१५	मधुघृताभ्यां उपासीत। ९.२.४० संस्थिते षडहे पृष्ठ्ये मधु आशयेत् घृतं वा।
आपध २.८.१८.१	मधुमांसं च वर्जयेत् (ब्रह्मचारी)। १०.६.३२
आपध २.११.२९.१	मध्यगं हि इदं दम्पत्योर् धनम्। ६.१.१७ कुटुम्बिनौ धनस्य ईशाते।
आप १२.२३.४	मध्यतः कारिणां चमसाध्वर्यवः ते च ऋत्विग्भिर् वरितव्याः। ३.७.२५ मध्यकारिणः– होता ब्रह्मा उद्गाता यजमानश्च चत्वारः।
भर १०.२.१ आप १२.२३.४	मध्यतः कारिणां चमसाध्वर्यवो वषट्कृतेऽनुवषट्कृते जुहुत, होत्रकाणां चमसाध्वर्यवः सकृत् हुत्वा शुक्रस्य अभ्युन्नीय उपावर्तध्वम्। ३.२.३० होत्रकाणाम् चमसाध्वर्यवः– मैत्रावरुणः, ब्राह्मणाच्छंसी, पोता, नेष्टा, अच्छावाकः, आग्नीध्रः षड् होतारः।
तैसं ६.२.५	मध्यन्दिने अपररात्रे व्रतं व्रतयति। ६.८.२९ मध्यरात्रे
तैसं २.५.५	मध्यमानां तण्डुलानाम् अग्नये दात्रे पुरोडाशः, स्थविष्ठानां इन्द्राय प्रदात्रे दधनि चरुः, क्षोदिष्ठानां विष्णवे शिपिविष्टाय शृते चरुः। ६.५.१०
जैब्रा २.१४५	मध्यमापस्य तिष्ठति। १.३.२४ तं. मध्ये आपस्येति।
मैसं ४.७.६	मध्यमेऽहन् त्रिरात्रस्य गृह्यते (षोडशी)। १०.५.३४,३९
आप २.१८.१०	मध्यात् पूर्वार्धाद् अवदेयम्। ६.४.२ मध्यात् पुरोडाशस्य अवदाय पूर्वार्धाद् अवद्यति।
आप २.१८.१०	मध्याद् अवद्यति, पूर्वार्धाद् अवद्यति। ५.२.४ आग्नेयस्य पुरोडाशस्य मध्याद् अङ्गुष्ठमात्रं तिरीचीनम् अवद्यति पूर्वार्धाद् द्वितीयं अनूचीनम्।

तां १३.१२.१५	मध्वाशयेद् घृतं वा । १०.४.१ मधु वा आशयेद् घृतं वा ।
तैसं २.५.११;६.३.७ ऐब्रा ५.२३	मनसा आघारम् आघारयति । मनसा प्रस्तौति, मनसा उद्गायति, मनसा प्रतिहरति । ३.४.८
वसिष्ठस्मृ २१.७	मनसा भर्तुर् अतिचारे यावकं क्षीरोदनं वा भुञ्जाना अधः शयीत । ऊर्ध्वं त्रिरात्राद् अप्सु निमग्नायाः सावित्र्या अष्टशतेन शिरोभिर् जुहुयात्, पूता भवति ॥ ६.१.१७-२१ न्यामा.
तैसं २.२.१०	मनुर् वै यत् किंचिद् अवदत् तद् भेषजं भेषतायै । १.३.७ तं.
शांब्रा १०.६	मनोताम् अन्वाह । १०.४.४२ तं. अथ मनोताम् अन्वाह ।
तां २३.१६.६	मनोर् ऋचस्ताः सामिधेनीषु धाय्या इति उच्यन्ते । ३.२.१९;१०.७.७३ मनोर् ऋचः सामिधेन्यो भवन्ति ।
तां ४.४.९	मनो मानसम् । १०.६.३४ वाग्वै द्वादशाहो मनोमानसम् ।
शत १४.५.४.५	मन्तव्यो बोद्धव्यः । १.३.२७ तं. द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।
पा १.३.२२,२५	मन्त्रकरणे उपतिष्ठतेर् आत्मनेपदं भवति । ७.३.३६ मन्त्रकार्यान्तर् हि संहृत्य कारित्वात् एकविनाशे समस्तावृत्तिः । २.२.२१ तं.
सत्याषाढ १.१.६	मन्त्रब्राह्मणयोर् वेद इति नामधेयम् । १.३.११ तं. मन्त्राश्च ब्राह्मणं च वेदः । २.१.३३ सूत्रम्–शेषे ब्राह्मणशब्दः । अथ किं लक्षणं ब्राह्मणं, मन्त्राश्च ब्राह्मणं च वेदः । २.१.३३
वाराह १.१.१.१६	मन्त्रान्तेन कर्म संनिपातयेत् । ९.४.९
निरुक्त ७.१.१	मन्त्रेण तत्र देवता स्मर्यते । ४.१.२० यत्कामः ऋषिर् यस्यां देवतायां आर्थपत्यम् इच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रः ।
मैसं ४.१.९	मन्त्रेण पुरोडाशम् अध्वर्युः 'प्रथस्व' इति ब्रूते । १.२.४३ 'उरु प्रथा उरु प्रथस्व' इति मन्त्रेण अध्वर्युः पुरोडाशं 'प्रथस्व' इति ब्रूते ।
पा. शिक्षा ५१	मन्त्रो हीनो स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोऽपराधात् । ९.४.२१
तैसं ७.२.७	मन्थ्यग्रान् अभिचर्यमाणस्य गृह्णाति । १०.५.६७,७०,७३,७५
ऐब्रा १४.४४ आश्व ५.१.३	मन्द्रं प्रातःसवने । ३.३.९ तं. मन्द्रया वाचा प्रातःसवने शंसेत्, बलीयस्या माध्यन्दिने, बलिष्ठतमया तृतीये सवने ।
सत्या २१.२.२६	मन्द्रया आज्यभागान्तं, परं मध्यमया, उत्तमया अनुयाजादि । ३.३.८ तं.
तैसं ३.२.५	'मन्द्राभिभूतिः केतुर् यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु' इति मन्त्रो जिह्वायास्तृप्तिं प्रकाशयति । ३.२.२४,२६
तैसं ३.२.५	'मन्द्राभिभूति...उपहूतस्योपहूतो भक्षयामि' इति मन्त्रो भक्षं प्रकाशयति । ३.२.२७
गीता ३.२३; ४.११	मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः । १.३.७ तं.
मैसं १.४.५ काठ ३१.१५	'ममाग्ने वर्चो विहवेषु अस्तु' इति पूर्वम् अग्निं गृह्णाति देवता एव तत् पूर्वेद्युर् गृहीताः श्वोभूते यजति । ३.८.२५;१२.१.२५;१२.२.२९
आप २२.७.२१	मरणकामो हि एतेन (सर्वस्वारेणक्रतुना) यजेत्, यः कामयेत अनामयं स्वर्गंलोकं इयाम् । १०.२.५६,५७
तैसं १.८.४	मरुद्भ्यः सांतपनेभ्यो मध्यन्दिने चरुं निर्वपति । ५.१.३०

शत २.५.३.४,१२,१३ तैसं १.८.४	मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं ओदनम् । आज्यभागौ यजति यज्ञतायै । १०.७.२४
तैसं २.५.१	मलवद्वाससा न संवदेत, न सह आसीत, न अस्या अन्नम् अद्यात्, अभ्यञ्जनं वाव स्त्रिया अन्नम् । ३.४.१८
महाभारत १.१.२७४	महत्त्वात् भारतत्वाच्च महाभारतमुच्यते । निरुक्तम् अस्य यो वेद सर्वपापैः प्रमुच्यते । १.३.११ तं.
तैसं १.४.२० तैसं १.४.२१	महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव । स्तोमैर् वत्सस्य वावृधे ॥ २.१.१९ (माहेन्द्रयाज्यानुवाक्या) महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः ससहोभिः । अस्मद्रियग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर् भूत ॥
तैसं १.४.४१	महाँ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु । स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान् द्वेष्टि ॥ २.१.१९
तैसं ६.५.५ ऐब्रा २.२१	महान् वा अयम् अभूद् यो वृत्रम् अवधीद् इति तत् महेन्द्रस्य महेन्द्रत्वम् । २.१.१६
तैब्रा १.६.९.१	महापितृयज्ञेन न होतारं वृणीते न आर्षेयम् । १०.८.१
कात्या २१.१.१०	महाभूमिर् न देया (विश्वजिति सर्वस्वदाने) । १.१.१
तां ७.६.१५,१६	महावृक्षौ वै बृहद्रथन्तरे निधनेन समाप्येते, यद् वै महावृक्षौ समृच्छयेते न हि अत्र विभ्रमम् इव । १०.६.२६
तैब्रा ३.९.१०.१	महिमानौ नाम ग्रहौ गृह्णाति । १०.४.३ स एतौ अश्वमेधे महिमानौ गृह्णीत । राजतेन पूर्वं सौवर्णेन उत्तरम् (आप २०.१३.२) ।
तैब्रा ३.५.१०.३	महेन्द्र इदं हविर् अजुषत । ३.२.१५-१८ न्यामा.
सत्या १.४.९	महेन्द्रयाजी – और्वो, गौतमो, भरद्वाजः । शुश्रुवान्, ग्रामणी, राजन्यः । ९.४.२९-३०
तैसं १.८.१९	मह्लादयः पशवः । ४.४.१ आदित्यां मह्लां गर्भिणीम् आलभते । मारुतीं पृश्निं पष्ठौहीम् अश्विभ्यः ।
भर १३.१८.१०	माणवको अवहन्ति अधीते । १.२.३७
तैसं १.१.३	मातरिश्वनो घर्मोऽसि । ३.३.१२ न्यामा.
पाम १.२.६४	माता च परमं दैवतं समा सर्वेषु पुत्रेषु । १०.१.१५
महाभारत १.९५.३०	माता भस्त्रा पितुः पुत्रः । १.२.१३ तं.
पाम १.२.६४	माता समः क्षिप्रश्च । १०.१.१५ धान्यमापकः ।
याज्ञस्मृ १.५३ मिताक्षराटीका	मातुलस्य सुताम् ऊढ्वा, मातृगोत्रां तथैव च । समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् । १.३.८-९ न्यामा.
ऋ ३.६.९	मादयस्व । ३.२.२६ (एभिरग्ने सरथं...अत्र)
शत ४.३.४	माध्यन्दिनपवमानः पञ्चदशः पञ्चसामा । १०.५.७-९ त्रिभिश्च गायत्रीत्रिष्टुब्बृहतीछन्दोभिः पञ्चभिः–गायत्र – आमहीयव – रौरव– यौधाजय–औशनससामभिः । (औशनस) (साम ६७२-६७९)

मैसं ४.७.६ माध्यन्दिनसवने गृह्यः (षोडशी)। तेजो वै माध्यन्दिनसवनं, तेजस एव वज्रं निर्मिमीते। १०.५.४४

तैसं ६.१.६ माध्यन्दिने सवने दक्षिणा नीयन्ते। १०.६.६९

तैसं १.१.१२ मा मा सं ताप्सम्। १.२.३४ तं.

तैसं १.३.२ मा मा हिंसीः। १.२.३४

मैसं १.४.८ मांसं न पचेयुः, यस्मिन् अग्नौ ये च पचेयुः तं क्रव्यादं कुर्युः। १२.२.२ न हि तस्मिन् अग्नौ मांसं पचन्ति यस्मिन् आहुतीर् जुह्वति।

ऊह तैसं १.१.६ मांसमसि धिनुहि देवान्। ९.१.३९ धान्यमसि धिनुहि देवान् इति मन्त्राद् ऊहितः।

आप ७.२८.८ मांसीयन्ति ह वा एतस्याजुह्वतोऽग्नयो यजमानस्य, ते यजमानम् एव ध्यायन्ति, यजमानं संकल्पयन्ति, पचन्ति ह वा अन्येषु अग्निषु वृथा मांसम्, अथ एतेषां नातोऽन्या मांसाशा विद्यते। १२.२.५

तैसं २.२.११ मारुतं चरुं निर्वपेत् पृश्नीनां दुग्धे प्रैयङ्गवं ग्रामकामः। १०.१.४१

मैसं ३.३.१० मारुतं जुहोति। २.१.११ मारुतान्।

मैसं २.४.८ मारुतं सप्तकपालं सौर्यम् एककपालम्। ४.२.१२

तैब्रा २.७.११.१,२ मारुतान् आलभन्ते। ११.२.५५ सप्तदशपृश्नीन् उक्ष्णः मारुतान् आलभन्ते।

मैसं ३.३.१० मारुतान् जुहोति। ४.२.२७

तैब्रा १.६.५.१ मारुतीम् आमिक्षां प्रतिप्रस्थाता दक्षिणे विहारे अनुतिष्ठति। ११.२.३३-४१ न्यामा.

तैब्रा १.६.५.१ मारुतीम् एव प्रतिप्रस्थाता दक्षिणस्मिन् विहारे हवींषि आसादयति। ११.२.३१

आप ८.६.१५

तैसं २.१.६ मारुतीम् पृश्नीम् आलभते। ४.४.१-२ न्यामा. मारुतं पृश्निम् आलभेत।

तैब्रा १.३.७.४ मारुत्यान् अनवदानीयान् सुराग्रहांश्च आजिसृद्भ्यो हरति। १०.७.७

तैब्रा १.६.५.४ मारुत्यामिक्षा। ११.२.६३

आप १.१६.२ मार्तिकेन प्रतिष्ठाकामस्य (अपः प्रणयेत्)। ४.३.४ मृण्मयेन।

शत १.१.१.१० माषान् मे पचत। २.१.३३

तां २५.४.१ मासं जुहोति। २.३.२४ तं. जुह्वति।

तां २५.४.१ मासं दर्शपूर्णमासाभ्यां यजते। २.३.२४;४.४.२१;७.३.१;८.२.२१ यजन्ते।

तां २५.४.१ मासमग्निहोत्रं जुहोति। २.३.२४;४.४.२१;८.२.२९;७.३.१० अग्निहोत्रवत् जुह्वति।

तां २५.४.१.२ मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाभ्यां यजन्ते, मासं वैश्वदेवेन, मासं वरुणप्रघासैर्, मासं साकमेधैर्, मासं शुनासीर्येण, त्रिवृता मासं, पञ्चदशेन मासं, सप्तदशेन मासम्, एकविंशेन मासं, त्रिणवेन मासम्, अष्टादश त्रयस्त्रिंशानि अहानि, द्वादशाहस्य दशाहानि, महाव्रतं च अतिरात्रश्च। (२) अग्निहोत्रं दशहोता, दर्शपूर्णमासौ चतुर्होता, चातुर्मास्यानि पञ्चहोता, सौम्योऽध्वरः सप्तहोता। ८.२.२९

तां २५.४.१ मासं यजते। २.३.२४ तं. मासं दर्शपूर्णमासाभ्यां यजन्ते।

तां २५.४.१ मासं वैश्वदेवेन (यजते)। २.३.२४ तं.

तैसं ७.५.१	मासि मासि अतिग्राह्या ग्रहा गृह्यन्ते । १०.८.२४,२८
	मासो देवता संवत्सरो देवता । १०.४.२१ न्यामा. (मन्त्रब्राह्मणे)
याज्ञस्मृ १.९५	माहिष्येण करण्यां तु रथकारः प्रजायते । ६.१.४४-५० न्यामा.
तैसं ६.५.५	माहेन्द्रग्रहं गृह्णाति । २.१.१७ तं.
सत्या १७.५.११	माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते । ५.२.२१
शत १३.५.१०	मित्रविन्दायां सप्तदशसामिधेन्यः । १०.८.१७
तां २५.१०.१-९	मित्रावरुणयोर् अयनाख्ये सारस्वतसत्रे – यथा अमावास्यायाम् अतिरात्रः स्यात् तथा दीक्षेरन् तेऽमावास्यायाम् अतिरात्रं संस्थाप्य तदहरेव वत्सान् अपाकुर्युः, तं पक्षम् अमावास्येन यजित्वा पौर्णमास्यां गाम् उपेयुः, पौर्णमासेन उत्तरं यजित्वा अमावास्यायाम् आयुषम् उपेयुः, एवम् आवर्तन्तो यजेयुः । (सारेण) २.४.२८ तं. (गौर् आयुर् एकाहौ)
मैसं १.१०.६	मिथुनं च वै दधि च शृतं च, अथ यत् संसृष्टं मण्डम् इव मस्तु इव परि च ददृशे गर्भ एव सः । ४.१.२४
तैसं ६.६.५	मिथुनं सरस्वत्या करोति प्रजनयति सौम्येन । ८.१.१४ रेतः सौम्येन दधाति प्रजनयति पौष्णेन ।
पा ७.३.८२	मिदेर् गुणः । ३.४.१३ तं. शितिप्रत्ययपरतः एव मेद्यति, मेद्यतः, मेद्यन्ति ।
आप २.१८.२३	मिश्रदैवतं हि आज्यम् – अग्नीषोमीयं, प्राजापत्यं, वैष्णवं च । ५.४.२१ आज्यहविर् उपांशुयाजः पौर्णमास्यां वैष्णवो अग्नीषोमीयः प्राजापत्यः ।
पा परिभाषा १६	मुख्यगौणयोश्च मुख्ये कार्यसंप्रत्ययः । ६.५.३४
तैसं ६.१.४	मुशली अन्वाह । ४.२.१८ (मुशली = मैत्रावरुणः) दण्डी प्रैषान् अन्वाह । ३.१.१२;४.२.१८
तैब्रा १.८.२.२	मुष्करा भवन्ति सेन्द्रियत्वाय । ४.१.१७; ६.८.३८ (सेन्द्रत्वाय)
आप ७.१९.३	मुष्टिना पिधाय वपोद्धारणम् आसीत आ वपाहोमात् । ३.६.२३
तैसं ५.२.१	मुष्टीकरोति (वाचं यच्छति) । ३.१.२४
गोभिलगृ २.८.२५	मूर्धन्यभिजिघ्राणम् । १.३.२४ तं. मूर्धन्यभिघ्राणम् इति वक्तव्ये ।
आप १.६.६	मूलतः शाखां परिवास्य उपवेषं करोति । ४.२.८
तैसं ७.३.१९	मूलेभ्यः स्वाहा । ९.१.६-१० न्यामा.
ऋ १०.३३.१-९	मूषिकासूक्तम् । २.१.२२ प्र मा युयुज्रे जनानाम् ।
तैसं ६.६.४	मूषिकासूक्तस्य एकादशिन्याम् अर्थवत्ता । ३.१.२ 'आखुस्ते रुद्र पशुः' इति ब्रूयात् ।
तैसं ७.५.२२	मृगारेष्टिः।११.२.२३ अग्नयेऽंहोमुचेऽष्टाकपाल इन्द्रायाँहोमुचे एकादशकपालो, मित्रावरुणाभ्यां आगोमुग्भ्यां पयस्या, वायोसावित्र आगोमुग्भ्यां चरुर्, अश्विभ्याम् आगोमुग्भ्यां धाना, मरुद्भ्य एनोमुग्भ्यः सप्तकपालो, विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमत्यै चरुर्, अग्नये वैश्वानराय द्वादशकपालो, द्यावापृथिवीभ्याम् अंहोमुग्भ्यां द्विकपालः ॥
आप १.१६.२	मृण्मयेन प्रतिष्ठाकामस्य अपः प्रणयेत् । ४.३.४ न्यामा.
मैसं ३.६.२	मृता वा एषा त्वग् अमेध्यं वा अस्य एतद् आत्मनि शमलं तदेव अपहते मेध्य एव मेधम् एव उपैति । ४.३.१

तैसं ६.१.३	मेखलया दीक्षयति । ५.३.२९ मेखलया यजमानं दीक्षयति ।
आप ७.१८.९	मेढ्रं ते आप्यायताम् इति मेढ्रम् । ४.१.१७ न्यामा.
मैसं ४.३.४	मेधपतये उपनयत आशासाना मेधपतये मेधम् । ९.३.३४
ऐब्रा २.६	मेधपतये मेधम् इति स यदि एकदेवत्यः पशुः स्यात्, मेधपतये इति ब्रूयाद्, यदि द्विदेवत्यो मेधपतिभ्याम् इति, यदि बहुदेवत्यो मेधपतिभ्यः इति स्थितम् ।
तैब्रा ३.६.६.१	मेधपतिभ्यां मेधम् आशासाना उपनयत ताभ्याम् । ९.३.३५ उपनयत मेध्या दुर् आशासाना मेधपतिभ्याम् ।
चरक ६.१.३०,३१	मेधाजननानि रसायनानि । ६.७.३३ वचा घृतं सुवर्णं च बिल्वचूर्णमितित्रयम् । मेध्यमायुष्यमारोग्यं पुष्टिसौभाग्यवर्धनम् ॥
षड् १.१.१५	मेधातिथिं हि काण्वायनं मेषो भूत्वा (इन्द्रो) जहार । ९.१.४३,४४
षड् १.१.१४,१५	मेधातिथेर् मेष इति, मेधातिथिं हि काण्वायनं मेषो भूत्वा जहार । ९.१.४३,४४
तैब्रा २.६.६.४	मेधोऽसि । २.१.३२ (पाठान्तरं – एधोऽसि)
तैसं २.१.९	मैत्रं श्वेतम् आलभेत वारुणं कृष्णम् अपां च ओषधीनां च सन्धौ । अन्नकामः । ८.१.१५; ९.३.१०,२७; ९.४.१
मैसं १.४.१२	मैत्रायणीयानां समिदादयः प्रयाजा नाम्नाताः अथ गुणाः श्रूयन्ते – ऋतवः प्रयाजा समानीयहोतव्याः ।
मैसं ३.९.८	मैत्रावरुण ऋत्विक् । १०.७.१८ मैत्रावरुणं वृणीते ।
तैसं ६.४.८	मैत्रावरुणं गृह्णाति । २.२.१७;९.४.४७;१०.४.३;१०.७.२ मैत्रावरुणो गृह्यते ।
तैसं ६.३.४	मैत्रावरुणदण्डेन भूमेः समक्रिया अद्भिर् अवसेचनं बलवद् अवधानम् अञ्जनम् इति यूपावरोहणे क्रियते । १०.२.७२
तैसं ६.४.८	मैत्रावरुणं पयासा श्रीणाति । ३.६.३४
मैसं ३.९.८	मैत्रावरुणं वृणीते । ३.७.२२
सत्या ९.६.२०,२१	मैत्रावरुणः प्रेष्यति च अनु च आह । ३.७.२२,४१.४३,४४; १०.७.१९ मैत्रावरुणीं पुरोनुवाक्याम् अन्वाह संप्रेषश्च भवति ।
तैसं ६.१.४	मैत्रावरुणाय दण्डं प्रयच्छति । ४.२.१७
मैसं ४.६.२	मैत्रावरुणे (ग्रहे) पयस्याम् अवदधाति । ३.८.३३
ऐब्रा ६.१०	मैत्रावरुणो मित्रावरुणौ 'मित्रं वयं हवामाहे' इति यजति । ३.२.२९
तैसं १.८.१९	मैत्रावरुण्याम् आमिक्षायां न वाजिनेन प्रचरन्ति । ७.३.२६
मैसं २.६.१३	मैत्रावरुण्यामिक्षा । ७.३.२६
तैसं १.८.१९	
ऋ १०.११७.६	मोघम् अन्नं विन्दते अप्रचेताः । २.१.३३ (+ सत्यं ब्रवीमि वध इत् स तस्य । नार्यमणं पुष्यति नो सखायं, केवलाघो भवति केवलादी ॥)
पा धातुपाठ २०५.१६६३	म्लेच्छ अव्यक्तायां वाचि । १.३.२७ तं.
छांउ ८.७.१	य आत्मा अपहतपाप्मा विजरो विमृत्युर् विशोको विजिघत्सोऽपिपासः सत्यकामः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः य एष आत्मा । १.३.२७ तं.
तैसं २.३.७	य इन्द्रियकामो वीर्यकामो वा स्यात् तम् एतया सर्वपृष्ठ्या याजयेत् । ३.५.१६-१७ न्यामा.

तैसं २.६.७	य इमं यज्ञम् अवान् ये यज्ञपतिं वर्धान् । १०.४.५१
काठकसं ८.१	य इष्ट्या पशुना सोमेन आग्रयणेन वा यक्ष्यमाणः स पौर्णमास्याम् अमावास्यायां वा यजेत । ५.४.२४; १२.२.२७
आप १०.२.८	य इष्ट्या पशुना सोमेन वा यजेत स पौर्णमास्याम् अमावास्यायां वा यजेत । ४.३.२९
तैसं ५.३.१२	य उ च एनं वेद तरति मृत्युम् । १.२.४,१६
षड् ४.१.१४	य एकः पशुर् अतिरिच्यते स ऐन्द्राग्नः कार्यः । ११.४.२६ आलभ्यः
तैसं ५.२.८	य एताम् इष्टकाम् उपदध्यात् स त्रीन् वरान् दद्यात् । ३.८.२ योऽविद्वान् इष्टकाम् उपदधाति स त्रीन् वरान् दद्यात् ।
तां १६.१.२	य एतेन (ज्योतिष्टोमेन) अनिष्ट्वा अथ अन्येन यजेत गर्तपत्यम् एव तत् जायते प्र वा मीयते । ५.३.३७,४३
तैसं ३.५.२	य एवं कश्चन स्तोमभागम् (तैसं ४.४.१) अधीयीत स एव ब्रह्मा (वासिष्ठो) भवेत् । ६.६.२५ इन्द्रो वसिष्ठाय एतान् स्तोमभागान् अब्रवीत् ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्त, तस्माद् वासिष्ठो ब्रह्मा कार्यः ।
तैसं ७.३.७	य एवं भूतिकार्यम् इच्छन्तः त एनं पञ्चदशरात्रम् उपेयुः । ८.२.३१ उपेयत्वात् सत्रत्वम् । श्रियं गच्छन्ति ओजो बलम् इन्द्रियं वीर्यम् आत्मन् धत्ते ।
तैसं ५.६.२	य एवं विद्वान् अग्निं चिनुते ऋध्नोत्येव । २.३.२१; ४.४.१२,१४,१७; ५.२.२२; ५.३ १६; ९.१.२६; १०.३.२३; १०.४.१; १०.८.२३
मैसं १.६.३	य एवं विद्वान् अग्निम् आधत्ते । ३.३.९; ६.१.१२,२९,३७; १०.४.२७,३०
तैसं १.६.९	य एवं विद्वान् अग्निहोत्रं जुहोति । ९.४.२८
तैसं १.६.९	य एवं विद्वान् अमावास्यां यजते । २.२.३; ९.१.२६,२८
मैसं ४.७.९	य एवं विद्वान् एतं षोडशिनं गृह्णाति भवति आत्मना पराऽस्य भ्रातृव्यो भवति । १०.५.३४,४२
तैसं ७.२.१०	य एवं विद्वान् द्वादशाहं यजते । ८.१.१७ द्वादशाहेन
तैसं १.६.९	य एवं विद्वान् पौर्णमासीं यजते । २.२.३;९.१.२६,२८
मैसं १.६.७	य एवं विद्वान् यज्ञायज्ञीयं गायति । ३.३.९;१०.८.९ गायते
मैसं १.६.७	य एवं विद्वान् वामदेव्यं गायति । ३.३.९;१०.८.९ गायते
मैसं १.६.७	य एवं विद्वान् वारवन्तीयं गायति । ३.३.९;१०.८.९ गायते
शांब्रा २.३	य एवं विद्वान् विराट्संपन्नं अग्निहोत्रं जुहोति । २.२.१६ तं. गार्हपत्यान्वाहार्यपचनयोश्चतस्रश्चतस्र आहुतीर् आहवनीये च +
तां ४.३.४.५	य एवं विद्वान् साम्ना स्तुवीत । ९.२.३०,३१ ऋचा स्तुवते साम्ना स्तुवते...
तैसं ३.२.२ तैब्रा २.२.४.७	य एवं विद्वान् सोमेन यजते । ३.१.११
तैसं ७.२.९	य एवं विद्वांसः सत्रम् आसते । ६.६.१,१६,२७; १०.६.४५,६०; ११.२.६४ ये सत्रम् आसते ।
ऐब्रा ५.२	य एवं विद्वांसः सत्रं उपयन्ति । ६.६.१,१६,२७;१०.६.४५,६०;११.२.६४ य एवं विद्वांसो यन्ति ।
साम ६.८.९.१	य एव हि अभिवतीभिर् (अभि त्वा शूर नोनुमो) इन्द्रः स्तूयते स एव माहेन्द्रग्रहेण इज्यते । २.१.१५ तं. सूत्र–वशावद् वाऽगुणार्थं स्यात् । गुणी-महेन्द्रः, अगुणम्-इन्द्रः ।

छांउ ८.७.१	य एष आत्मा अपहतपाप्मा विजरो विमृत्युर् विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः । १.३.२७ तं.
आप ४.२०.६	यं कामयेत पापीयान् स्याद् इति नीचैस्तरां तस्य याज्यया वषट्कुर्यात् । १०.२.५४
आप ४.२०.६	यं कामयेत प्रमायुकः स्याद् इति तस्य उच्चैस्तरां कुर्यात् (याज्यया) । १०.२.५४
तैसं २.४.१३	यं कामयेत राजन्यं अनपोध्यो जायेत वृत्रान् घ्नन् चरेत् तस्मै एतम् ऐन्द्राबार्हस्पत्यं चरुं निर्वर्तयेत् । ३.२.१९ न्यामा.
आप ४.२०.६	यं कामयेत वर्षीयान् (वसीयान्) स्याद् इति उच्चैस्तरां तस्य याज्यया वषट् कुर्यात् । १०.२.५४
तैसं १.७.१	यं कामयेत पशुमान् स्याद् इति परार्चीं तस्य इडाम् उपह्वयेत अपशुमान् एव स्यात् । १०.२.५४ (उपहूतेडेति तत् पराची उपहूतेति तत् प्रतीची आप ४.२०.२०)
मैसं १.६.८ आप ५.२१.७	यं कामयेतोत्तरं वसीयान् श्रेयान् स्याद् इति तस्य अग्नये पवमानाय निरूप्य अथ पावकाय शुचये हवींषि समानबर्हिषि निर्वपेत् । ११.४.१३
आप यज्ञपरिभाषा ६४,६३	यच्च पौर्णमास्यां विहितं सा पौर्णमासी यद् अमावास्यायां विहितं सा अमावास्या । ६.३.१,५ उपदिष्टम्
ऐब्रा ७.३३	यच् चमसान् जुहोति । ३.७.३९ तं. चमसान् जुह्वति ।
जैब्रा २.२७९	यच् चामुष्यै कामाय यज्ञा आह्रियन्ते । ४.३.२८ (कैकेयो यज्ञं...)
पा धातुपाठ १००२	यज-देवपूजासंगतिकरणदानेषु । १.३.७ तं.
तैब्रा १.६.३.४	यजमान एककपालः । १.४.२३ यजमानो वा एककपालः ।
तैब्रा १.६.३.६,७	यजमान एककपालः सर्वहुतः कर्तव्यः, स्वर्ग आहवनीयः तत्र प्रतिष्ठितो भवति । १.४.२३ यजमानो वा एककपालः सकृद् होतव्यः सुवर्गो लोक आहवनीयः, यदेककपालम् आहवनीये जुहोति यजमानम् एव सुवर्गं लोकं गमयति ।
ऐब्रा ३५.३०	यजमानचमसः फलमयः एकेषाम् । ६.६.२२ क्षत्रियो यजमानोऽथ अस्य एष स्वभक्षो न्यग्रोधस्य अवरोधाश्च । फलानि च औदुम्बराणि आश्वत्थानि प्लाक्षाणि अभिषुणुयात् तानि भक्षयेत् ।
ऐब्रा ३५.२९	यजमानचमसः सोममयः एकेषाम् । ६.६.२२ ब्राह्मणानाम् एव त्रयाणां भक्षाणाम् एकम् आहरन्ति, सोमं वा दधि वा अथ सोमं ब्राह्मणानां सभक्षः ।
शत २.४.४.२५	यजमानपञ्चमाः समुपहूता इडां भक्षयन्ति । ६.४.४;१०.२.२२; १२.१.३० होता अध्वर्युः ब्रह्मा आग्नीध्रः यजमानश्च ।
तैसं ६.२.७	यजमानम् एव प्रजया पशुभिः प्रथयति । १.२.५
आप ११.१६.११-१५	यजमानम् पत्नीं पुत्रांश्च भ्रातृंश्च अहतेन वाससा प्रच्छाद्य वाससोऽन्ते गदण्डम् उपनिबध्य जुहोति । १.३.४ न्यामा.
तैसं ६.२.१०	यजमानसंमिता औदुम्बरी भवति । २.१.३३; ६.६.६; ९.१.४०; १०.२.४९, ५८; १२.४.२८ यजमानेन संमिता ।
आश्व ५.९.५	यजमानस्य याज्या सोऽभिप्रेष्यति 'होतर् एतद् यज' इति स्वयं वा निषद्य यजति । ३.५.४४
तैसं २.६.५; ६.२.८	यजमानः प्रस्तरः । १.४.२३

वाराह ३.२.१.२ यजमाना एव ऋत्विजः स्युः । १०.६.५२ ब्राह्मणानां सप्तदशानां सताम् एको गृहपतिः षोडश ऋत्विजो यजमानाः ।

तैब्रा ३.३.५.२ यजमानावेक्षितेन आज्येन होमः । ६.१.१७ अग्नेर् जिह्वाऽसि सुभूर् देवानाम् इति यजमानश्चक्षुषी निमिल्य आज्यम् अवेक्षते ।

तैसं ६.२.१० यजमानेन संमिता औदुम्बरी भवति । ९.१.४१ यजमानसंमिता ।

शत ३.६.१.६ यजमानेन संमिता औदुम्बरी परिवासयति । ६.६.४ यजमानेन संमाय ...

तैब्रा १.३.७.३ यजमानो यूपः । १.४.२५; ७.३.३४

मैसं १.१०.७ यजमानो वा एककपाल आहवनीयः स्वर्गो लोको यत् सर्वहुतं करोति हविर्भूतम् एव एनं स्वर्गं लोकं गमयति । १.४.२३

आप १८.३.१० यजुर्युक्तं रथम् अध्वर्यवे ददाति, ऋग्भिर्युक्तं रथं होत्रे, सामभिर् युक्तं रथम् उद्गात्रे । १०.३.७५ (यजुषा युनक्ति– तैब्रा १.३.५) इन्द्रस्य वज्रोऽसि इत्यादिमन्त्रैर् संस्कृतम् ।

ऐब्रा ५.३३ यजुर्वेदतो यज्ञो विनष्टः इति अन्वाहार्यपचने 'भुवः स्वाहा' इति होतव्यः ।
छां ४.१७.५ ३.४.१३ तं. यदि यजुष्टो यज्ञम् आर्तिम् इयात्...

तैब्रा ३.२.१.१ यजुषा वत्सान् अपाकरोति । ९.४.३७ यत् पर्णशाखया वत्सान् अपाकरोति ब्रह्मणा (यजुषा) एव एतान् अपाकरोति ।

तां १६.१५.५ यजेत स्वर्गकामः । २.२.१७; ४.४.१९ स्वर्गकामो यजेत ।

आप १०.२.१ यजेत स्वर्गकामो वसन्ते वसन्ते । २.२.१७ वसन्ते वसन्ते ज्योतिषा यजेत-ज्योतिष्टोमेन स्वर्गकामो यजेत ।

तैसं २.४.११ यज् जगत्या परिदध्यात् अन्तं यज्ञं गच्छेत् अथ यत् त्रिष्टुभा परिदधाति
मैसं २.४.४ नान्तं गच्छति । ५.३.६

तैब्रा १.१.६.९ यज् जुहुयाद् यथापूर्वम् आहुतीर् जुहुयात् यन् न जुहुयात् अग्निः परा पतेत् तूष्णीम् एव होतव्यम् । १०.८.८

तैब्रा ३.३.५.५ यज् जुह्वां गृह्णाति ऋतुभ्यस्तद् गृह्णाति, ऋतवो वै प्रयाजाः प्रयाजेभ्यस्तत् ।
शत १.३.२.८ ४.१.४३

पा १.२.३४,३३ यज्ञकर्मणि (एकश्रुतिः)–अजपन्यूङ्खसामसु । ९.२.३० न्यामा. जपन्यूङ्ख (ओकाराः) सामवर्जितेषु एकश्रुतिः ।

वाराह १.२.४.११ यज्ञं तनिष्यन्तौ अध्वर्युयजमानौ वाचं यच्छतः । ९.१.२४ अध्वर्युयजमानौ वाचं यच्छेताम् आहविष्कृतः ।

तैसं ६.२.७ यज्ञम् एतिम् एव तत् प्रजया पशुभिः प्रथयति । १.२.४३

तैसं ३.१.३ यज्ञं वा एतत् संभरन्ति यत् सोमक्रयण्यै पदम् । ४.१.२५ न्यामा.

सत्या १.१.१ यज्ञं व्याख्यास्यामः । १.३ २४ तं.

आप १.३.३ यज्ञस्य घोषद् असि इत्यादि मन्त्रैर् दात्रच्छिन्नं बर्हिः सम्पाद्यते । १०.१.१-३ न्यामा.

तां १६.१.२ यज्ञानां प्रथमो यज्ञः (ज्योतिष्टोमः) । १.३.३९-४२ न्यामा.

साम ७०३ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे गा यीरा गिरा इति गाने, ऐरं कृत्वा
तां ८.६.१० तदा 'आयीरा (आईरा) इरा' । ९.२.५०-५३ न्यामा.

तां ५.६.२	यज्ञायज्ञीयं पुच्छं गायति। ९.१.५३ तं. महाव्रतस्य यज्ञायज्ञीयं (साम) पुच्छं कार्यम्। पुच्छेन उद्गाता आत्मना गायेत (तां ५.१.१,१८;५.२.१)।
साम ७०३ ऋ ६.४८.१	यज्ञायज्ञीयं साम–यज्ञायज्ञा वो अग्नये गिरा गिरा च दक्षसे। प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्॥
साम ७०४ ऋ ६.४८.२	ऊर्जो नपातं स हि नायमस्मयुर् दाशेम हव्यदातये। भुवद् वाजेष्वविता भुवद् वृध उत त्राता तनूनाम्। ९.१.५० न्यामा.
तां ८.६.२	यज्ञायज्ञीयेन स्तुवन्ति ।। ९.१.५२
तैसं १.६.८	यज्ञायुधानि संभरन्ति। ३.१.११ न्यामा.
ऋ १०.९०.१६	यज्ञेन यज्ञम् अयजन्त देवाः, तानि धर्माणि प्रथमानि आसन्। १.१.२;२.१ ३३
तैसं ७.३.७	यज्ञे यं कामम् इच्छन्तस्ते एनं पञ्चदशरात्रम् उपेयुः। ८.२.२९-३२ न्यामा. य एवं विद्वांसः पञ्चदशरात्रम् आसते भ्रातृव्यान् एव पराभाव्य विजित्य श्रियं गच्छन्ति, पाप्मानं निर्दहन्ते ओजो बलम् इन्द्रियम् आत्मन् धत्ते।
आपध १.२४.२.१५	यज्ञोपवीतिना कर्तव्यम्। १.३.५ यज्ञोपवीती प्रदक्षिणं दैवानि कर्माणि करोति।
शत १२.२.७.१० आप ९.११.१०	यज्ञोपवीती देवेभ्यो दोहयति। ३.४.९+१,३ (उपवीतं देवानाम् उपव्ययते तैसं २.५.११) उपरि हि देवेभ्यो धारयति इति लिङ्गात्।
तैआ २.१.१	यज्ञोपवीत्येव अधीयीत याजयेद् यजेद् वा यज्ञस्य प्रसृत्यै।
मैसं ३.६.९	यज्ञो वै देवतानां (देवानां) न समभवत् तं भूत्या समभावयन्, यद् भूतिं वनुते यज्ञस्य भूत्यै द्वादशरात्रीर् दीक्षितो भूतिं वन्वीत। १०.२.२७
सत्या ७.३.३६	यज्ञो वै देवेभ्योऽश्वो भूत्वाऽपाक्रामत् सोऽपः प्राविशत्, स वालधौ गृहीतः, स वालान् विवेश ह, ते वालाः काशतां प्राप्ता। १.३.९ तं.
तैसं २.६.५	यतस्तण्डुला भवन्ति तत् प्रोक्षितव्यम्। ९.१.३ व्रीहीन् प्रोक्षति।
वैशेषिकसूत्र १.२.७	यतो द्रव्यगुणकर्मसु सत् इति प्रतीतिः सा सत्ता। १.३.३० तं.
तैउ ३.१.१	यतो वा इमानि भूतानि जायन्ते। ३.३.१ तं.
तां १०.५.१४	यत्कामो व्यूढछन्दसा द्वादशाहेन यजते सोऽस्मै कामः समृद्ध्यते। १०.५.७९-८२ न्यामा.
मैसं ३.८.२	यत् किंचित् प्राचीनम् अग्नीषोमीयात् तेन उपांशु चरन्ति। ३.३.९ तं.
शत १.४.५.१०	यत् किंचित् प्राजापत्यं यज्ञे क्रियते तद् उपांशु एव क्रियते। २.२.१०
मैसं ३.९.४	यत् किल यज्ञे दुरिष्टं तद् यूपे आमुच्यते, यत् सुकृतं तद् यजमाने। ९.३.९
तैसं ६.६.१०	यत् तूष्णीं तत् प्राजापत्यं स मनसा जुहोति, मन इव हि प्रजापतिः। २.२.९,१०
तैब्रा १.८.६.१	यत् त्रिषु यूपेषु आलभते बहिर्धाऽस्माद् इन्द्रियं वीर्यं दध्याद् भ्रातृव्यम् अस्मै जनयेद् एकयूपे आलभेत। ८.१.१५
तैब्रा २.६.७.४,५	यत् त्वष्टारं च वनस्पतिं च आवाहयसि। अथ वेतौ यक्ष्यसि, त्वाष्ट्री नवमी प्रयाजेज्या, वानस्पत्या दशमी। अत्रैव एतौ इष्टौ विद्यात्। ९.४.५९
तैसं ५.६.८	यत् पक्षसंमितां मिनुयात् कनीयांसं यज्ञक्रतुम् उपेयात् पापीयसी अस्य आत्मनः प्रजा स्याद्, अथ यदि वेदिसंमितां मिनोति। वेदिसंमितां मिनोति कनीयसीं प्रजां कनीयसः पशून् कनीयसोऽन्नाद्यं पापीयान् स्यात, ज्यायांसम् एव यज्ञक्रतुम् उपैति, नास्य आत्मनः पापीयसी प्रजा भवति। २.४.८

शत १२.३.४.१७ यत् पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते । ३.५.१४

शत ४.२.३.६ यत् पराञ्चम् उक्थ्यात् निगृह्णाति (षोडशिनम्) । १०.५.४३,४५ तं पराञ्चं

तैब्रा १.६.८.६ यत् परुषि दिनं तद् देवानां, यद् अन्तरा तन् मनुष्याणां, यत् समूलं तत् पितॄणाम् । ३.४.११

तैसं ६.६.६ यत् पर्यग्निकृतं पात्नीवतम् उत्सृजति । २.३.१९

तैब्रा ३.२.१.१,३ यत् पलाशशाखया वत्सान् अपाकरोति, यत् प्राचीम् आहरेद् देवलोकम् अभिजयेत् । ४.२.७ न्यामा.

तैसं ३.१.४ यत् पशुर् मायुमकृतोरो वा पद्भिर् आहते अग्निर् मा तस्माद् एनसो विश्वान् मुञ्चतु अंऽहसः । ६.८.२८

कात्या २२.२.२५ टीका यत् पशून् दद्यात् सोऽनृतं कुर्यात् । १०.३.६८ न्यामा. ऋतं वै सोमोऽनृतं पशवः +

तैब्रा १.३.१०.२ यत् पितृभ्यः पूर्वेद्युः करोति पितृभ्य एव तत् यज्ञं निष्क्रीय यजमानो देवेभ्यः प्रतनुते । ४.४.१९

तैब्रा १.६.८.४ यत् पूर्णं तन् मनुष्याणाम्, उपर्यर्धो देवानाम्, अर्धः पितॄणाम् । ३.४.११

मैसं ४.३.७ यत् पूर्वं त्रिसंयुक्तं वीरजननं तद्, यद् उत्तरं त्रिसंयुक्तं पशुजननं तत् । ११.४.३

तैसं ६.६.८ यत् पृष्ठ्येऽतिगृह्णीयात् प्राञ्चं यज्ञं पृष्ठानि संशृणीयुः, यद् उक्थ्ये गृह्णीयात् प्रत्यञ्चं यज्ञम् अतिग्राह्याः संशृणीयुः । १०.८.२३

आप यज्ञपरिभाषा ६४,६३ यत् पौर्णमास्याम् उपदिष्टं सा पौर्णमासी यद् अमावास्यायाम् उपदिष्टं सा अमावास्या । ६.३ ५,१

तैसं ७.१.४ यत् प्रथमं द्विरात्रस्य तद् द्वितीयं द्वादशाहस्य यद् द्वितीयं द्विरात्रस्य तत् तृतीयं द्वादशाहस्य । १०.५.१२ गायत्रं साम पूर्वेऽहन् भवति, उत्तरे त्रैष्टुभम् ।

मैसं २.३.२ यत् प्रयाजानां पुरस्ताज् जुहुयाद् बहिर् आत्मनां सजातानां दध्याद्, यद् अनुयाजानाम् उपरिष्टात् स्वर्गं लोकम् अपक्रामेत । ४.४.७ तं. (बहिरात्मा वै प्रयाजानुयाजा आत्मा देवता +)

तैसं २.६.१ यत् प्रयाजानुयाजा इज्यन्ते वर्म वा एतद् यज्ञस्य क्रियते, वर्म यजमानस्य भ्रातृव्यस्य अभिभूत्यै । ४.३.१;४.४.३०;१०.१.१८

तैआ ५.१ यत् प्रवर्ग्यं प्रवृणक्ति । ३.३.३२ तं.

मैसं ३.८.२ यत् प्राचीनम् अग्नीषोमीयात् तद् उपांशु चरन्ति । ९.१.२२

तैब्रा ३.२.१.३ यत् प्राचीमाहरेद् देवलोकं तद् अभिजयेत् । ४.२.७ न्यामा.

मैसं ४.७.६ यत् प्रातःसवने गृह्णीयात् (षोडशिनं) वज्रम् उत्तरे सवने व्यतिरिच्येत यन् माध्यन्दिने वज्रं निहन्यात्, तृतीये सवने गृह्यः, तत् सर्वेषु सवनेषु गृह्णाति न पूर्वे सवने आर्तिं नीते । १०.५.४४

तैब्रा १.५.११.१ यत्र च ज्योतींषि स्तोमाः स ज्योतिष्टोमः । ४.४.४०

आप १२.१४.१ यत्र जगत्याम् उत्पन्नं साम स जगत्सामा, स विषुवान् । १०.५.५८

तैसं २.५.७ — यत्र तत्रस्था प्र वो वाजा त्रिर् अभ्यसितव्या । ९.१.३३ त्रिः प्रथमाम् आह (त्रिरुत्तमाम्) ।

मैसं २.२.३ — यत्र बाणवन्तः परिभयः तत्रापि पालाशाः उत्पादयितव्याः, पूर्वपक्षे सिद्धान्ते बाणवन्तः एव संमार्ष्टव्याः । २.१.१२ (ब्राह्मणस्पत्ये चरौ)

तैसं ४.६.४
ऋ ६.७५.१७ — यत्र बाणाः संपतन्ति कुमारा विशिखा इव । १.३.२

मैसं ४.५.२ — यत्र होतुः प्रातरनुवाकम् अनुब्रुवतः उपशृणुयात् तदाऽपोऽध्वर्युर् गृह्णीयात् । ३.७.४२,४५

शत ३.६.१.१० — यत्रान्या ओषधयो म्लायन्ते, ते (यवाः) मोदमानाः इव उत्तिष्ठन्ति । १.३.९ तं.

तैब्रा ३.५.१०.४ — 'यत्रायुराशास्ते यजमानस्तत्र प्रस्तरं प्रयच्छते एवं कामो यजमानः' इति । १०.२.१९

काठकसं २०.१२ — यत् सप्तदशवती उभयत उपदधाति, अन्नम् एव उभयतो दधाति, तस्माद् द्वाभ्यां हस्ताभ्यां परिगृह्य पुरुषोऽन्नम् अत्ति । १.३.९ तं.

शत २.४.३.९ — यत् सर्वहुतं करोति सा तु एका परीक्षा, हुतोहुतः पर्यावर्तते सा द्वितीया, आज्यस्यैव द्यावापृथिवी यजेत । ७.१.३३; ७.३.२६

महाभारत १.१.३९ — यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथा भाति युगादिषु ॥ १.३.७ तं.

वाराह ३.२.७.२७ — यथा गृहीतान् ग्रहान् ऋत्विज उपाददते – आश्विनम् अध्वर्युः, सारस्वतं ब्रह्मा, ऐन्द्रं प्रतिप्रस्थाता । ३.५.१४

भर १४.१६.११ — यथा चमसम् अन्यान् चमसान् चमसिनो भक्षयन्ति अथैतस्य हारियोजनस्य सर्वे एव लिप्सन्ते । ३.५.२८,२९,३०

तैब्रा २.१.२.१२ — यथाऽतिथये प्रद्रुताय अन्नम् आहरेयुः, तादृक् तद् यद् उदिते जुहोति इति अपरे पुनर् उदितहोमं निन्दन्ति । २.४.८

सत्या ६.३.१७,१८ — यथाऽनुपूर्वं स्वरुभिः पशून् समज्य मध्यमे रशनागुणे स्वे स्वे स्वं स्वं यूपशकलम् उपगूहति । ४.२.५

षड् ३.३.२२ — यथा वै दक्षिणपाणिर् एव देवयजनम् । १.३.७ तं.

मैसं १.८.७ — यथा वै मत्स्योऽविदितो जनम् अवधूनुते एवं वा एतेऽप्राशमाना जनम् अवधून्वते । ३.६.२०

षड् ४.२.३ — यथा वै श्येनो निपत्य आदत्ते, एवम् अयं द्विषन्तं भ्रातृव्यं निपत्य आदत्ते यम् अभिचरन्ति । १.४.५

षड् ४.४.४ — यथा संदंशनं दुरादानम् आदत्ते । १.४.५

तैसं ५.३.४ — यथा सृष्टम् एव अवरुन्धे । १.४.२७ न्यामा.

तां ८.३.१ — यद् अकालयत तत् कालेयस्य कालेयत्वम् । १.३.२४ तं.

मैसं १.८.७ — यद् अग्नये च प्रजापतये च सायं जुहोति । १.४.४; ७.३.४ यत् सूर्याय च प्रजापतये च प्रातः । २.२.१६ तं.

तैब्रा २.१.२.१० — यद् अग्नये सायं जुहोति । १.२.५९

तैब्रा १.७.४.४ — यद् अग्नये स्विष्टकृते अवद्यति । १०.७.३४ न्यामा.

मैसं ३.९.१ — यद् अगृहीत्वा आज्यानि सोमम् आसादयेयुः अपघ्नन्ति यजमानम्, अथ यद् गृहीत्वा आज्यानि सोमम् आसादयेयुः न यजमानम् अपहन्ति । १२.१.१२

ऊहः तैसं १.५७	यद अघृतम् अभोजनं तत् । १.४.२६ अयज्ञो वा एष योऽसामा इति मन्त्राद् ऊहितम् ।
निरुक्त १.१८	यद् अधीतम् अविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज् ज्वलति कर्हिचित् । १.३.२४ तं.
शत १.१.३.१२,१३	यद् अध्वर्युयजमानौ वाचं यच्छतः तत् प्रजापतिभूयं गतौ यज्ञं तन्वाते, तस्मात् प्रणीताः प्रणेष्यन् वाचं यच्छति । ९.१.२०-२५ न्यामा.
तैसं ६.३.८	यद् अनुपोष्य प्रयायाद् ग्रीवबद्धम् एनम् अमुष्मिन् लोके नेनीयेरन् । ८.१.९
तैब्रा ३.५.१०.५	यद् अनेन हविषा आशास्ते । ३.२.१,३
मैसं ३.९.४	यद् अन्तर्वेदि मिनुयान् निर्दहेद्, यद् बहिर्वेदि अनवरुद्धः स्याद् अर्धम् अन्तर्वेदि मिनुते अर्धं बहिर्वेदि अवरुद्धो भवति न निर्दहति । ३.७.१३
तां २३.८.३	यद् अन्यतरतोऽतिरात्रस्तेन अहीनः । ८.२.२९-३२ न्यामा.
मैसं २.४.२	यद् अन्यदेवत्या पुरोडाशा भवन्ति अन्यदेवाः पशवः तद् अस्याः (सौत्रामण्याः) (सत् समृद्धम्) । १०.१.२५
तैसं ६.२.३	यद् अन्याम् आहुतिं पुरस्तात् जुहुयात्, अन्यन् मुखं कुर्यात्, स्रुवेण आघारम् आघारयति । १०.७.४५,४६
तैआ २.१५	यद् अपि च अध्ययनमात्रं समामनन्ति यं यं क्रतुम् अधीते तेन तेन तस्य अभीष्टं भवति । १.१.१
पाम १.१.१.१२	यद्यप्यविद्वांसः – अविद्वांसः प्रत्यभिवादे नाम्नो येन प्लुतिं विदुः । कामं तेषु तु विप्रोष्य स्त्रीष्विव 'अयम् अहं वदेत्' । १.३.२४ तं.
तैब्रा १.६.१०.१	यद् अभिघारयेद् रुद्राय आस्ये पशून् अभिदध्यात् । १०.८.८
मैसं ३.८.९	यद् अवृता वषट्कुर्युर् भ्रातृव्यं यज्ञस्य आशीर् गच्छेद्, यद् वृता वषट् कुर्वन्ति एकधा तद् यजमाने आशीः यज्ञस्य प्रतितिष्ठति । ११.३.१९
तैसं १.५.१	यद् अश्रु अशीर्यत तद् रजतं हिरण्यं अभवत् । १.२.१
तैसं २.२.५	यद् अष्टाकपालो भवति गायत्र्या एव एनं पुनाति । १.४.१७; ४.३.३८ गायत्रिया
तैब्रा ३.३.५.५	यद् अष्टौ उपभृति गृह्णाति प्रयाजानुयाजेभ्यस् तद् गृह्णाति । ३.८.९-११ न्यामा.
शत २.१.३.९ तैब्रा १.१.२.८	यद् अहरेव एनं श्रद्धा उपनमेत् तदहर् आदधीत । ५.४.१६ यदैवैनं कदा च यज्ञ उपनमेद् अथ अग्नीऽआदधीत (शत) । यदैवैनं यज्ञ उपनमेत् अथ आदधीत (तैब्रा) ।
तां १७.१४.१	यदा अग्निहोत्रं जुहोति अथ दशगृहमेधिनः आप्नोति, एकया रात्रिया यदा दशसंवत्सरान् अग्निहोत्रं जुहोति अथ दर्शपूर्णमासयाजिनम् आप्नोति, यदा दशसंवत्सरान् दर्शपूर्णमासाभ्यां यजते अथ अग्निष्टोमयाजिनम् आप्नोति, यदा दशभिर् अग्निष्टोमैर् यजते अथ सहस्रयाजिनम् आप्नोति, एवं दशदशभिर् गुणेन अयुतं प्रयुतं नियुतम् अर्बुदं न्यर्बुदं निखर्वं बद्वम् अक्षितम् – यदा दशभिर् अक्षितैर् यजते गौर् भवति, ततः अग्निः, ततः संवत्सरस्य गृहपतिम् आप्नोति । १.२.१७ तं.
तैसं २.६.३	यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां च अच्युतो भवति । १.४.९; २.२.३; ३.४.३७; ४.१.२९; ६.३.५; ६.४.१; १०.४.२३; १०.८.२९,४३; ११.२.१

तैसं २.६.३ यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति, आग्नेयोऽष्टाकपालोऽमावास्यायां भवति। २.३.२७,२८,२९ अन्यार्थो वा पुनः श्रुतिः। ऐन्द्राग्नार्थम्।

शत ५.१.२.१,३ यद् आग्रयणाद् गृह्णाति षोडशिनम्। १०.५.४७ आग्रयणानन्तरम्।

तैसं ६.१.१ यद् अङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते। ४.३.१

तां ६.७.१५ यदा च उद्गातुः पूर्वम् अवच्छेदः प्रतिहर्तुस्तदा सर्ववेदसं दद्यात्। ६.५.५५

तां ७.२.१ यद् आजिम् ईयुस्तद् आज्यस्य आज्यत्वम्। १.४.३

कात्या २२.३.३७ यद् आज्यं तद् हतं नवनीतम् (श्येने)। ३.८.३९-४१

मैसं १.४.१३ यदा तद् हविः संतिष्ठते अथ एतद् हविर् निर्वपेत्। ६.४.१८,१९,२०,२१

आप १.२.११ यद् आतिथ्यायां बर्हिस्तद् उपसदां तद् अग्नीषोमीयस्य। ४.२.२९; १२.१.४१

भर १२.२.८ आतिथ्येष्ट्या ऊर्ध्वं त्रिषु दिनेषु उपसदोऽनुष्ठेयाः औपवसथ्येऽहनि अग्नीषोमीयः अतः आतिथ्ये दिने त्र्यार्थं बर्हिर् उपादेयम्॥

सत्या २०.४.२

ऐब्रा ३५.३३ यदाऽन्यान् चमसान् उन्नयति अथ एनम् उन्नयति। ३.५.५०

ऐब्रा ३५.३३;७.३३ यदाऽन्यान् चमसान् जुह्वति, अथ एतस्य दर्भतरुणकेन उपहत्य जुहोति। ३.५.१९

तां ६.७.१४ यदा प्रतिहर्तुः पूर्वं अपच्छेदस्तद् उद्गातुः तदा अदक्षिणेन यजेत तद् यज्ञम् इष्ट्वा पुनर् एतेनैव यजेत तत्र तद् दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात्। ६.५.५५

तां १८.१.१८ यदा बृहत्सामा तदा रुक्मललाटो (अश्वो) दक्षिणा। २.४.२९ उपहव्योऽनिरुक्तो उक्थ्यो यज्ञो बृहत्सामा अश्वः श्वेतो रुक्मललाटः।

तैसं १.६.७ यदाऽरण्यान् अश्नाति तेनारण्यान्, इन्द्रियम् एव आत्मन् धत्ते। १२.१.३०

सत्या १७.४.४ यदा रथन्तरसामा तदा अश्वः श्वेतो दक्षिणा। २.४.२९ उपहव्योऽनिरुक्तस्तेन अभिशस्यमानं याजयेत्, अग्निष्टोमो यज्ञः।

आप १०.१४.९ यदा वै दीक्षितः कृशो भवति अथ मेध्यो भवति। ३.८.९-११ न्यामा.

मैसं ३.६.६ यदा वै पुरुषे न किंचिद् अन्तर् भवति, यदाऽस्य कृष्णं चक्षुषो नश्यति अथ मेध्यतमः। ३.८.१०

तां १३.१२.१४ यदा षडहः संतिष्ठते न बहु वदेत् नान्यं पृच्छेत् नान्यस्मै ब्रूयात्। १०.४.१

मैसं ३.६.६ यदाऽस्मिन् अन्तर् न किंचन भवति अथ मेध्यो भवति। ३.८.९-११ न्यामा.

आप १०.१४.९ यदाऽस्य कृष्णं चक्षुषो नश्यति अथ मेध्यो भवति। ३.८.९-११ न्यामा.

आप १०.१४.९ यदाऽस्य त्वचाऽस्थि संधीयते अथ मेध्यो भवति। ३.८.९-११ न्यामा.

तैब्रा १.१.१०.५ यद् आहवनीये जुहोति तेन सोऽस्य अभीष्टः प्रीतो भवति। २.३.४;३.१.२२; ३.४.२६;५.४.२७; ६.३.१८;६.४.२७; ६.९.११;७.३.३१;८.४.८;१०.८.१६;११.२.२८,२९,३०,३१;११.३.२;१२.२.३;१२.४.१९,२४,२५

मैसं ३.८.९ यदि कामयेत वर्षेत् पर्जन्यः इति नीचैः सदो मिनुयात्। ३.८.१३;४.२.२५;१०.२.५०

तैब्रा ३.७.२.२ यदि कीटोऽवपद्येत अन्तः परिधि निनयेत्। ८.४.२०,२८ यत् कीटावपन्नेन जुहुयात् अप्रजा अपशुर् यजमानः स्यात्, मध्यमेन पर्णेन द्यावापृथिव्यर्चा अन्तः परिधि निनयेत्।

तां २१.१४.१६ यदि कूटः काणो वा भवेद् बार्हस्पत्यं चरुं निर्वपेत् । ११.२.५४ यदि श्लक्ष्णो वा कूटो वा भवेद् बार्हस्पत्यं चरुं निरुप्य अन्यम् आलभेत् ।

आप १२.१४.१ यदि जगत्सामा सोमः स्याद् आग्रयणाग्रान् ग्रहान् गृह्णीयात् । १०.५.५८

मैसं ३.९.४ यदि द्वौ (यूपौ) उपस्पृशेद् 'एतौ ते वायू' इति, यदि बहून् 'एते ते वायवः' इति ब्रूयात् । ९.३.९

मैसं ३.४.८ यदि (यत्) पक्षसंमिता स्यात् । २.४.२६

आप ९.१४.३ यदि पत्नीः संयाजयन् कपालम् अभिजुहुयात् वैश्वानरं द्वादशकपालं निर्वपेद्, एकहायनो गौर् दक्षिणा स्यात् । १०.२.४६

कात्या २५.९.१ यदि पशुर् उपाकृतः पलायेत अन्यं तद्वर्णं तद्वयसम् आलभेत । १.३.३२ पशुश्चेद् उपाकृतः पलायेत वायवे तम् अनुदिश्य ...

तां ६.७.१५ यदि प्रतिहर्ताऽपच्छिद्येत सर्ववेदसं दद्यात् । ६.५.४९-५६ यदि प्रतिहर्ताऽपच्छिद्यते पशुभिर् यजमानो व्यृध्यते, पशवो वै प्रतिहर्ता, सर्ववेदसं दद्यात् ।

तैब्रा १.१.६.९ यदि पूर्वं न क्रियेरन् आभिर् उद्वासयेत् तस्मात् तूर्ष्णीं होतव्यम् । ५.३.२१ यदि न जुहुयाद् अग्निः परापतेत्, तूष्णीम् एव होतव्यम् ।

आप ९.११.१४ यदि प्रदीयेरन् तत्र न भवेयुः । ४.१.९ ब्राह्मणेभ्यो यज्ञपात्राणि दत्तानि न दहने स्युः ।

तां. २१.१४.१७ यदि प्रापतेत् (पशुः) वायव्यं चरुं निरूप्य अथ अन्यम् आलभेत । ११.२.५४

मैसं १.१०.७ यदि प्रावृषि यजेत सकृद् उपस्तृणीयाद् द्विर् अभिधारयेद् वृष्टयेव पशून् अभिजिघ्रति । १०.४.५६

तां. ८.८.११ यदि बृहत्सामाऽतिरात्रः स्यात्सौभरम् उक्थ्यानां ब्रह्मसाम कार्यम् । १.२.२८ तं.

तैब्रा १.८.६.२ यदि ब्राह्मणं न विन्देत वल्मीकवपायाम् अवनयेत् । ३.५.१४-१५ न्यामा.

मैसं ४.४.९ यदि ब्राह्मणो यजेत (अवेष्टिं) बार्हस्पत्यं मध्ये निधाय आहुतिम् आहुतिं हुत्वाऽभिघारयेद् यदि राजन्य ऐन्द्रं, यदि वैश्यो वैश्वदेवम् । २.३.३;११.४.८,९

काठकसं १९.७ यदि भिद्येत तैः कपालैः संसृज्य अन्याम् (उखां) कुर्यात् सा एव ततो यज्ञस्य निष्कृतिः । २.२.२८ तं.

आप १२.२४.५ यदि राजन्यं वैश्यं वा याजयेत् (सोमेन) स यदि सोमं बिभक्षयिषेत, न्यग्रोधस्य स्तिभिनीर् आहृत्य ताः संपिष्य दधनि उन्मृज्य तम् अस्यै भक्षं प्रयच्छेत् न सोमम् । ३.५.४७

तां. ८.८.१२ यदि रथन्तरसामाऽतिरात्रः स्याद् रथन्तरसाम्ना सौभरं कुर्याद् अजामितायै । २.२.२८ तं.

आप १२.१४.१ यदि रथन्तरसामा सोमः स्याद् ऐन्द्रवायवाग्रान् गृह्णीयाद्, यदि बृहत्सामा शुक्राग्रान्, यदि जगत्सामा आग्रयणाग्रान्' । २.३.१;१०.५.५७,६३,७०

मैसं ४.४.६ यदि राजन्यो (अवेष्टिं) यजेत ऐन्द्रं मध्ये निधाय आहुतिम् आहुतिं हुत्वाऽभिघारयेत् । २.३.३ न्यामा.

तैसं २.४.१० यदि वर्षेत् तावत्येव जुहुयाद्, यदि न श्वोभूते जुहुयाद् होतव्यं हविर् निर्वपेत् । ४.३.२१,२४

मैसं ३.१०.७	यदि वसन्ते यजेद् द्विर् उपस्तृणीयात् सकृद् अभिधारयेत्। ओषधयो वै प्रियङ्गवः, ओषधीषु एव पशून् प्रतिष्ठापयति । १०.५.५९
तां ९.२.१	यदि सत्राय दीक्षिता अथ सम्युत्तिष्ठेरन् सोमम् अपभज्य विश्वजिता अतिरात्रेण सर्वस्तोमेन सर्वपृष्ठेन सर्ववेदसदक्षिणेन यजेरन् । ६.५.२५
तां ९.८.१ कात्या २५.७.३	यदि सत्राय संदीक्षितानां प्रमीयेत् तं दग्ध्वा कृष्णाजिने अस्थीनि उपनह्य योऽस्य नेदिष्ठं स्यात् तस्य स्थाने दीक्षयित्वा तेन सह यजेरन्, ततः संवत्सरेऽस्थीनि याजयेत् । १०.२.४७
तां ९.५.३	यदि सोमं न विन्देत पूतिकान् अभिषुणुयात्, यदि न पूतिकान् (विन्देत) अर्जुनानि (अभिषुणुयात्)। ३.६.४०;६.३.१४,३१,३२
आप १४.२४.१८;२५.३ शत ४.५.१०.१,६	यदि सोमम् अपहरेयुर् एकां गां दक्षिणां दद्यात् अभिदग्धे पञ्च गाः। ४.१.१२
शत ४.५.१०.१	यदि सोमम् अपहरेयुर् विधावत गच्छत इति ब्रूयात् । ४.५.१०;१०.२.५७
आप १०.२.८	यदीष्ट्या यदि पशुना यदि सोमेन यजेत अमावास्यायां वा पौर्णमास्यां वा यजेत । ४.३.१
तैसं ६.६.८	यद् उक्थ्ये गृह्णीयात् प्रत्यक्षं यज्ञम् अतिग्राह्याः संशृणीयुः । १०.८.२३
तैब्रा १.५.९	'यद् उग्रं वचोऽपावधीत्, त्वेषं वचोऽपावधीत् स्वाहा' इति अशनायापिपासे ह वा उग्रं वचः एनश्च वैरहत्यं च त्वेषं वचः । २.१.४८ न्यामा.
कात्यायन १.१२.१८	यद् उत्तरयोः पवमानयोस्तृचाय हिंकरोति, अथ कस्माद् बहिष्पवमाने सकृद् एव हिंकरोति, एकं हि तत्र साम इति ब्रूयाद् । १०.५.५६ स्वारम् एव गायत्रम् इति वचनात् । (एकच्छन्दः प्रातःसवनम्–षड् १.३.१)
तैब्रा २.१.२.१२	यद् उदिते सूर्यें प्रातर् जुहुयाद् यथाऽतिथये प्रद्रुताय शून्याय आवसथायाः । २.४.८
तैब्रा ३.३.५.५	यद् उपभृति गृह्णाति (आज्यं) प्रयाजानुयाजेभ्यस्तद् गृह्णाति, छन्दांसि हि अनुयाजाः, यद् अष्टौ कृत्वा उपभृति गृह्णाति छंदोभ्यस्तद् गृह्णाति, अनुयाजेभ्यस्तद् गृह्णाति छंदांसि हि अनुयाजाः। ४.१.४४
ऐब्रा ७.१४	यद् उपस्तृणाति अभिधारयति अमृताहुतिम् एव एनां करोति। १०.२.३; १०.८.३० अमृतं वै आज्यं मर्त्यं हविः ...
तैसं ६.५.८	यद् उपांशुपात्रेण आग्रयणात् पात्नीवतं गृह्णाति । ३.२.३२
तां ४.३.४.५	यद् ऋचा स्तुवते तद् असुरा अन्वायन्, यत् साम्ना स्तुवते तद् असुरा नान्वायन् य एवं विद्वान् साम्ना स्तुवीत । ६ २.३१
तैआ २.१०	यद् ऋचोऽधीते यद् यजूंषि यद् ब्राह्मणानि । यद् इतिहासपुराणानि यत् कल्पान् । १.३.११ तं.
तैसं ३.४.१०	यद् एकया जुहुयाद् दर्विहोमं कुर्यात्, पुरोनुवाक्याम् अनूच्य याज्यया जुहोति सदेवतत्वाय । ८.४.१
तैसं २.२.५	यद् एकादशकपालो भवति त्रिष्टुभा एव अस्मिन् इन्द्रियं दधाति। ४.३.३८
तैसं ६.३.७	यद् एकादशप्रयाजान् यजति पशुम् एव तत् प्रयजति । १२.१.१ यावान् एष पशुः तं प्रयजति ।

तैसं ६.३.११ यद् एकादशानुयाजान् यजति पशुम् एव तत् अनुयजति । १२.१.१ यावान् एष पशुः तम् अनुयजति ।

तैब्रा २.१.४.९ यद् एतद् असंस्थिते तर्हि यज्ञः । ९.१.३१ (यदि प्रागुत्तमाद् पत्नी संयाजान्तता न चेत्)

तैसं ७.१.४ यद् एतद् द्विरात्रस्य उत्तरे गृह्यते । षोडशी । १०.५.५४ षोडश्युत्तरे ।

तैसं ५.६.२ यद् एनं चरुं उपदधाति...बार्हस्पत्यो भवति । २.३.१८

तैब्रा १.६.५.१,२ यदेवाध्वर्युः करोति तत् प्रतिप्रस्थाता करोति ११.२.४३

मैसं ३.८.२ यदेवास्याघ्नन्तं क्षुरम् अकुर्वंस्तद् आप्याययन्ति । ८.१.८ यदेवास्य घ्नन्तः क्रूरम् अक्रन् तद् आप्याययन्ति, सर्वे ऋत्विज आप्याययन्ति ।

काठकसं २१.३ यदेवास्य ऊनं यच् छिद्रं तद् अनया पूरयति 'लोकं पृण छिद्रं पृण' इति । ५.३.२०

आप १०.१५.१ यदेका दीक्षा तिस्र उपसदः । १२.२.२७

तां ८.६.९,१० यद् गिरा गिरेति ब्रूयाद् आत्मानं तद् उद्गाता गिरति ऐरं कृत्वा उद्गायेत् । १०.४.१,१०

मैसं ३.९.१ यद् गृहीत्वा आज्यानि आसादयन्ति न यजमानम् उपहन्ति । १२.१.१२

शत ९.३.२.३ यद् ग्रहान् जुहोति । ३.७.३९ तं.

तैसं ६.६.४ यद् दक्षिणतः उपशयः । ७.३.३५-३६ न्यामा.

तैसं ६.१.४ यद् दीक्षिताय दण्डं प्रयच्छति । ४.२.१६-१८ न्यामा.

शत ३.८.३.१ यद्देवत्यः पशुः तद्देवत्यः पशुपुरोडाशः । १०.१.२०

मैसं ३.२.१० यद् दोष्णः पूर्वार्धाद् अग्नये समवद्यति, गुदस्य मध्यतः, श्रोण्याः जघनतः, तथा अस्य सवनस्य पशोः अग्नयेऽवत्तं भवति । १०.७.११

तैसं २.२.५ यद् द्वादशकपालो भवति जगत्या एव अस्मिन् पशून् दधाति यस्मिन् जाते एताम् इष्टिं निर्वपति पूत एव स तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवति । १.४.२२;१०.७.११

तैसं ७.४.९ यद् द्वादशोपसदो भवन्ति आत्मानम् एव एतत् निरवदयते । ७.४.१४
तां ४.९.२१ (द्वाभ्यां लोम अवद्यति...)

मैसं ४.५.२ यद्यग्निष्टोमो जुहोति, यदि उक्थ्यः, परिधिम् अनक्ति, यदि अतिरात्रः एतद् एव यजुर् जपन् हविर्धानं प्रतिपद्येत । ३.६.४२

शत ११.४.१ यद्यगृहीतं हविर् अभ्युदियात्, यत् पूर्वेद्युर् दुग्धं दधि हविर् आतञ्चनम् तत्
आप ९.४.११.१३ कुर्वन्ति, प्रतिमुञ्चन्ति वत्सान् तान् एव तत्र पुनर् अपाकुर्वन्ति, तान् अपराह्णे पर्णशाखया अपाकुर्वन्ति, तदु यथैवादः प्रज्ञातम् आमावास्यं हविर् एवम् एव तत् । ६.५.१५

तैब्रा १.१.६.९ यद् यजुषा जुहुयात् अयथापूर्वम् आहुतीः कुर्यात् । ५.३.२१

गीता ३.२१ यद् यद् आचरति श्रेष्ठस्तत् तदेवेतरो जनः । स यत् प्रमाणं कुरुते, लोकस्तदनुवर्तते । १.३.७ तं.

मैसं ३.९.४ यद्यन्यस्य वृक्षस्य स्वरुं कुर्यात् अन्येऽस्य लोकम् अन्वारोहेयुः, यूपस्य स्वरुं करोति । ४.२.२,३

ऐब्रा १.१४ यद्यपि चतुर्वत्ती यजमानः पञ्चावत्ता एव वपा कार्या । १०.७.६४,७१,७२,७३

ऐब्रा २.१० — यद्यप्यन्यदैवतः पशुः आग्नेय्या मनोता कार्या । १०.४.४२ यदन्यदेवतः पशुः आग्नेयीरेव मनोता ।

तां २१.१४.१५ — यद्यवसीदेत् नैर्ऋतं चरुं निरूप्य अथ अन्यं (पशुम्) आलभेत । ११.२.५४

ऐब्रा ५.३३ — यद्यविज्ञातो (दोषः) 'भूर् भुवः स्वः' इति आहवनीये एव जुहुयात् । १.३.७; १२.३.१६ तं.

तां ६.७.१४ — यद्युद्गाताऽवच्छिद्यते यज्ञेन यजमानो व्यृध्यते, अदक्षिणः स यज्ञक्रतुः संस्थाप्य अथ अन्यम् आहृत्य तस्मिन् तद् देयं यत् पूर्वस्मिन् दास्यन् स्यात् । ६.५.४९-५५ (प्रातःसवने बहिष्पवमानेन स्तोष्यमाणाः ऋत्विजः शालायाः बहिः प्रसर्पन्ति एकस्य पुरतोऽन्यः पृष्ठतो गन्तुः कच्छं गृहीत्वा एव यन्ति, एवं सति यदि उद्गाता प्रमादात् कच्छं मुञ्चेत् तदा तं यज्ञं विना दानेन संस्थाप्य अन्यं यजेत । ६.५.४९-५५ न्यामा.

वसिष्ठस्मृ १८.११.१२ — यद्यु (पद्यु) वा एतत् श्मशानं यत् शूद्रः तस्मात् शूद्रसमीपे नाध्येयम् । ६.१.३८

शत ३.८.३.२५ — यद् यूप परिशिष्यते तत् समक्तशाभ्याम् आनयति, तद् हृदयं प्रास्यति जिह्वां वक्षः तनिमतः तस्याः वनिष्ठुम् (+ अथ उपरिष्टाद् द्विर् आज्यस्य अभिघारयति) । १०.७.२४

ऐब्रा ५.३२ — यदृक्तो (यदि ऋक्तो) यज्ञ आर्तिम् इयात् 'भूः स्वाहा' इति गार्हपत्ये जुहुयाद्, अथ यदि यजुष्टो दक्षिणाग्नौ 'भुवः स्वाहा' इति, यदि सामतः 'स्वः स्वाहा' इति आहवनीये जुहुयात्, यदि अविज्ञाता सर्वव्यापद् वा 'भूर् भुवः स्वः' इति आहवनीये एव जुहुयात् । १२.३.१६

तैसं २.६.३ — यद्येकं कपालं नश्येद् एको मासः संवत्सरस्य अपेतः स्यात् अथ यजमानः प्रमीयेत द्यावापृथिव्यम् एककपालं निर्वपेत्, यदि द्वे नश्येयातां द्वौ मासौ संवत्सरस्य अपेतौ स्याताम्, अथ यजमानः प्रमीयेत आश्विनं द्विकपालं निर्वपेत् संख्याय उद्वासयति यजमानस्य गोपीथाय । ४.३.३८

मैसं ३.९.४ — यद्येकं यूपं उपस्पृशेद् 'एष ते वायो' इति ब्रूयाद्, यदि द्वे 'एतौ ते वायू' इति, यदि बहून् 'एते ते वायवः' इति । ९.३.५,९

कात्या २२.१.१८ — यद्येतावता (द्वादशशतेन) न इच्छेयुः सर्वस्वेनापि आनमयितव्या ऋत्विजः । ६.७.१९ (प्रतिप्रसवो हि...)

तैब्रा १.४.१०.५ — यद् विश्वे देवाः समयजन्त तद् वैश्वदेवस्य वैश्वदेवत्वम् । १.४.१३-१६ न्यामा.

षड् ४.४.३ — यद् वै दुरादानं संदंशेन तद् आदत्ते । १.४.५

मैसं ४.६.८ — यद् वैश्वदेवः प्रातःसवने गृह्यते प्रातःसवने वा एतद् यज्ञं संस्थापयन्ति । १०.२.८ वैश्वदेवस्तुतिः नान्यसवननिवृत्तिः ।

तैब्रा १.८.६.२ — यद् वै सौत्रामण्यां व्यृद्धं तद् अस्याः (सौत्रामण्याः) समृद्धं यद् अन्यदेवत्याः

मैसं २.४.२ काठकसं १२.१२ — पुरोडाशा भवन्ति अन्यदेवत्याः पशवः । १०.१.२४

षड् ३.१.१ — यद् होता जहाति वाग् हि तद् यजमानं जहाति । १.३.२४ तं.

मैसं ३.९.८ — यद् होतारं वृणीते जगन्ति तद् वृणीते । ११.३.१९

तैसं ७.५.९ — यन्ति वा एते मिथुनाद् ये संवत्सरम् उपयन्ति अन्तर्वेदि मिथुनौ संभवतः तेनैव मिथुनान् नयन्ति । १०.६.४३

तैसं २.२.५ यन् नवकपालो भवति त्रिवृता एव अस्मिन् तेजो दधाति । ४.३.३८

ऊहः तैसं १.५.७ यन् मलिनम् आवासस्तत् । १.४.२६ 'असत्रं वा एतद् यद् अछन्दोमम्' इति मन्त्राद् ऊहितम् ।

स्थितं नैवेहि जात्यादेः परत्वं व्यक्तितो हीनः॥ (जात्यात्मिका व्यक्तिः)

जायमानस्य हि पुरुषस्य अग्रे शिरो जायते, मध्ये मध्यं, पश्चात् पादौ, एवम् आग्नेयोऽग्रतः उपांशुयाजो मध्ये अग्नीषोमीयः पश्चात्। ४.४.३७ सूत्रम् – उत्पत्तौ अभिसम्बन्धात् अङ्गोपदेशः स्यात्।

जुहोतिर् आसेचनाधिकः उत्सर्गः। ४.२.२८ सूत्रम् – तदुक्ते श्रवणात् जुहोतिर् आसेचनाधिकः। यजत्युक्तेऽर्थे जुहोति श्रूयते।

ज्ञानस्य अप्रामाण्यस्य स्वतस्त्वं प्रामाण्यस्य परतस्त्वम्। १.१.२

ज्योतिष्टोमेन अग्निष्टोमसंस्थेन रथन्तरपृष्ठेन गवां द्वादशशतदक्षिणेन यक्ष्ये तत्र त्वम् उद्गाता भव। १०.२.३५-३८ न्यामा.

ज्योतिष्टोमे सोमयागः प्रधानम्। ४.४.४० सूत्रम् - गुणानां तु उत्पत्तिवाक्येन सम्बन्धात् कारणश्रुतिः तस्मात् सोमः प्रधानः स्यात्। त्रिवृदादिस्तोमकः सोमयागः। स ज्योतिष्टोमः।

ज्यौतिष्टोम्यस्तु दक्षिणाः – सर्वासाम् एककर्मत्वात् प्रकृतिवत् तस्मात् नासां विकारः स्यात्। ज्यौतिष्टोम्यः हि दक्षिणाः साङ्गकर्मराशिम् अङ्गीकृत्य सकृद् दीयन्ते। १०.६.६५

तच्च विदित्वा यथानुरूपम् अनुष्ठातुं क्षमा वयं न तु वेदं पर्यनुयोक्तुम्। १.२.१ तं.

तत्काला या सुब्रह्मण्या (द्वादशाहे) सा तु आवर्तेत, प्रयोगं प्रति तस्या विशेषसंयोगत्वात्। १०.३.२२

तत् परिसमापयन् श्रुतं करोति, परित्यजन् श्रुतं जहाति। १०.५.८ इति प्रारब्धं परिसमापनीयं गम्यते।

तत् प्रख्यं च अन्यशास्त्रम्। १.४.४ सूत्रम्-अग्निहोत्रादिशब्दानां नामधेयता तत्प्रख्यन्यायः।

तत् प्रत्यक्षविहितं च आर्षकल्पेन न तत्र अनुमानं विद्यते। इति ब्राह्मण-विहितादपि आर्षकल्पविहितगरीयस्त्वं अङ्गीकृतम्। १.३.११

तत् प्रवृत्तिः गुणेषु स्यात् प्रतिपद्य यूपदर्शनात्। ८.१.१५ ऐकादशिनाम् अर्थः तत्कारकं हेतुसंज्ञं भवति।

तत्र यूपादिकरणवद् व्याकरणपरम्परा अनादिकालत्वाद् अनुपालम्भः। १.३.२४-२९ न्यामा.

तत्रान्यान् ऋत्विजो वृणीरन्। सूत्रम् – १०.२.४२ न हि पृष्ठशमनीये ये सत्राद् उदवसातारः ते कर्तारो विधीयन्ते।

तत्रार्थात् प्रतिवचनम्। ३.५.४२ तदुपहूत उपह्वयस्व इत्येतदेव प्रतिवचनम्।

तत् सर्वं बलवतः पथ्यम्। १.३.७ तं.

तत्सिद्धि- जाति-सारूप्य- प्रशंसा- लिङ्ग- भूमभिः। षड्भिः सर्वत्रशब्दानां गौणी वृत्तिः प्रकल्पिता। १.४.२३-२८ न्यामा.

तत्स्नेहनं करोति – प्रथमं स्नेहनं करोति। ४.१.३८ (वाजपेये)

तदागमे हि तद् दृश्यते। २.१.१ तं. सूत्रम् – शब्दवत् तु उपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथा अन्येषाम्। ४.१.१५ अश्वागते अश्वो ज्ञायते – दृश्यते।

तदादि उत्कर्षे तदन्तम् अपकर्षे स्यात्। ५.१.२४ सूत्रम् – तदादि वाऽ-भिसम्बधात् तदन्तम् अपकर्षे स्यात्।

'तदुपहूत उपह्वयस्व' इति अनेन अनुज्ञापयेत् (सोमपाने)। ३.५.४१ सूत्रम् – प्रतिवचनम् उत एतदेव।

तदुभयाश्रयत्वात् समत्वेनापि युज्यते। १.३.९ तं. (मनुवचनम्) नवतन्तुकं त्रिवृत्।

तदेतद् अपेशलम्। ३.१.१२

तद्धितेन देवतोपदेशः, कपालवत्ता, निर्वपतिशब्दश्च इष्टिषु दर्शपूर्णमासयोर् लिङ्गानि। ८.१.११

तद् बर्हिः परिसमाप्तायाम् आतिथ्यायाम् आसीत् पूर्वं तद् आतिथ्यायाम् अपवृक्तम् आसीत्, पूर्वं तद् आतिथ्यायाम् आसीत, उपसत्काले आतिथ्या-सम्बधस्तस्य नास्ति । ४.२.२९ आतिथ्यायाम् अपवृक्तम् आसीत् पूर्वं तद् आतिथ्यायाम् आसीत् ।

तद्भूतानां क्रियार्थेन समाम्नायः, अर्थस्य तन्निमित्तत्वात् । १०.७.२९

तस्माद् अपि आऽमित्रौ सङ्कल्य नाम्ना चेद् ह्वयेते मित्रम् एव भवतः ।

तस्य ज्ञानम् उपदेशः । १.१.५

तस्याघारम् आघार्य । १.४.४ चतुर् गृहीतं वा एतद् अभूत् तस्याघारम् आघार्य ।

तस्या यावदुक्तम् आशीर् ब्रह्मचर्यम् अतुल्यत्वात् । ६.१.२४ तस्याः पत्न्याः आशीर् ब्रह्मचर्यं स्यात्, विद्यादिषु अतुल्यत्वात् ।

तादर्शीं तु धर्मजिज्ञासाम् अधिकृत्य अथशब्दं प्रयुक्तवान् आचार्यः, या वेदाध्ययनम् अन्तरेण न सम्भवति । १.१.१

तिलको मे स्पन्दते । ८.४.२८ इति तिलकाभावे तद्देशलक्षणया भवन्ति वक्तारः ।

तां ४.४.२ तिस्र उष्णिह एका गायत्री तास्तिस्रो बृहत्यः ।

आप १.१२.५ तिस्रो दोहयित्वा- बहु दुग्धीन्द्राय देवेभ्यो हव्यम् आप्यायतां पुनः, वत्सेभ्यो मनुष्येभ्यः पुनर् दोहाय कल्पताम् इति त्रिर् वाचं विसृज्य अनन्वारभ्य तूष्णीम् उत्तरा दोहयति ।

तैसं ५.४.१२ तिस्रोऽनुष्टभश्चतस्रो गायत्रीः कुर्वन्ति ।

तैले पीते पानीयं न पातव्यम् । विलेप्य यवागूश्च पीयते । ९.४.३४

तैसं ६.१.३ त्रिवृत् पञ्चदश सप्तदश एकविंशाश्चत्वारः स्तोमाः ज्योतिष्टोमे, त्रिणवत्र-यस्त्रिंशाच द्वौ अधिकौ अतिरात्रे ।

त्रयी विद्याख्या च तद्विदि । ३.३.५ सूत्रम् –त्रयी यस्य विद्या स त्रयीविद्यः । त्रीन् वेदान् अधीते स त्रयीविद्यः । ऋक्सामयजुःषु त्रयीशब्दः ।

त्रयोदश रात्रादिषु सत्रभूतस्तेषु आसनोपायिचोदनात् । ८.२.२७

ऐब्रा ५.३३ त्रय्या विद्यया–ऋचैव हौत्रं क्रियते, यजुषा आध्वर्यवं, साम्ना उद्गीथम्, अथ केन ब्रह्मत्वं ? त्रय्या विद्यया इति ब्रूयात् ।

त्रिपर्वा । ३.३.३१ दशमुष्टि स त्रिपर्वा परिमाणयोः ।

तैसं ६.१.१ दक्षिणं पूर्वम् आङ्क्ते, सव्यं हि मनुष्याः पूर्वम् आञ्जते ।

मैसं ३.१०.१ दक्षिणस्य पूर्वपदस्य अवदेयम् इति ह स्माहुर् दाक्षिणायनाः तथाऽस्य सर्वस्य पशोर् अवत्तं भवति ।

दक्षिणाकाले यत् स्वं विद्यते, तदेव देयं न यत् प्राग् ऊर्ध्वं च (विश्वजिति सर्वस्वं देयम् ।) ६.७.७ सूत्रम् – दक्षिणाकाले यत् स्वं तत् प्रतीयेत, तद्दानसंयोगात् ।

दक्षिणायुक्ता वहन्ति ऋत्विजः । १०.२.२४ सूत्रम्– दक्षिणायुक्तवचनाच्च । परिक्रयणार्थं वा कर्मसंयोगात् ।

ददातिः = आत्मनः स्वत्वस्य व्यावृत्तिः । ४.२.२८

दर्भज्वालया त्रिः प्रदक्षिणीकरणं = पर्यग्निकरणम्। ३.६.१८ न्यामा.

कात्या १.१५ दर्वी द्व्यङ्गुलः पृथ्वग्रः।

दर्विहोमाः- नारिष्ठहोमेषु, सर्वेष्टिषु, सर्वपशुबन्धेषु प्रवर्तमाना दृष्टाः।८.४.१८ सूत्रम् - तच्चोदना वा इष्टेः प्रवृत्तित्वात् तद् विधिः स्यात्।

शत ५.५.४.१४ दर्विहोमान् यो राजसूयेन यजेत।

दर्विहोमेषु अतिदेशः। ८.४.१-२८ न्यामा.

तैब्रा ३.७.५.११ दश ते तनुवो यज्ञ यज्ञियाः।

दार्शपूर्णमासिकस्य हविषो विकारौ सुरावाजिने। ८.२.५ औषध (व्रीहि) विकारः सुरा, सांनाय्यविकारो वाजिनम्।

दार्शपौर्णमासिको विध्यन्तः सोमे- दीक्षणीयायां प्रायणीयायाम् आतिथ्यायां पशौ वाजिने सुराग्रहेषु च। ८.१.१

दिग्देशकालशब्दो हि (वचनो हि) पराक् (पराक् पराञ्चम्)। १०.५.४७ सूत्रम् - पराक्शब्दस्य देशवाचित्वात्।

दीक्षाणाम् उपसदां च दर्शनं नावकल्पते वाजपेये (दार्शपौर्णमासिकविध्यन्ते) १.४.७ सूत्रम् - तुल्यत्वात् क्रिययोः, तुल्ये हि इमे क्रिये, या च वाजपेय-क्रिया या च दर्शपूर्णमासक्रिया।

दीक्षासु तु विनिर्देशात् अक्रत्वर्थेन संयोगः। तस्माद् अविरोधः स्यात् विश्वजिति सर्वस्वदानात्, किञ्चिच्छेषयितव्यं नास्ति, दीक्षासु विनिर्देशो भवति। ज्योतिष्टोमे-इदं क्रत्वर्थम्, इदं भक्षार्थम्, इदम् (ऋत्विजाम्) आनमनाय। तदिह आनमनाय यद् दातव्यं तस्य अयं विकारः सर्वता नाम। ६.३.१२

दीक्षा दक्षिणं तु वचनात् प्रधानस्य-सोमस्य। तिस्रो दीक्षाः, द्वादशशतं दक्षिणा।

दीक्षिता ते ब्रह्मचारिणः। १०.६.३२ सूत्रम् - मधु न दीक्षिता ब्रह्मचारित्वात्।

दीक्षिताः सत्रैर् यजते, अदीक्षिता अहीनैर् यजन्ति। १०.६.५८ स्वयंकर्तृत्वात् सत्राणाम् अदक्षिणत्वात् च। १०.६.५९ अदक्षिणत्वात् सत्राणां स्वयं कर्तृकत्वम्।

दूरभूयस्त्वात्। १.२.१२ सूत्रम् - रात्रौ धूमस्य, दिवा च अग्नेर् ज्वालायाः अदर्शनं दूरभूयस्त्वात्।

दृष्टकार्यम् अदृष्टाद् बलीयः। १०.१.२३

दृष्टो हि तस्यार्थः कर्मावबोधनम्। १०.१.२३

पशुपतिर् अनेन उपचरितः पुत्रोऽनेन लब्धः। ९.१.९

दैक्षस्य च इतरेषु। ८.१.१३ सूत्रम् - दैक्ष इति अग्नीषोमीय उच्यते, दीक्षा-सम्बधात्। इतरेषु पशुषु सवनीयादिषु अग्नीषोमीयस्य विध्यन्तः।

द्यावोस्तथेति चेत्। १.३.२४ तं. द्याव्यापृथिव्यो इति वक्तव्ये।

द्रव्यस्य तु कर्मार्थता स्वभावतः पुरुषप्रयत्नस्य च फलार्थता। ६.१.१

द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिः अर्थवादः स्यात्। १.१.१ न्यामा.

द्वादशाहस्य दशाहस्य दश अहानि महाव्रतम् अतिरात्रं च। १०.६.६०

द्वादशाहस्य सत्रत्वम् आसनोपायि चोदनेन यजमानबहुत्वेन सत्रशब्द-संयोगाच्च । ८.२.२४

द्वादशाहस्य व्यूढसमूढत्वं, तत्र व्यूढः समूढविकारः स्यात् । १०.५.७८,८०

द्वे एते चतुर्गृहीते । ४.१.४८ सूत्रम् – द्वयोस्तु हेतुसामर्थ्यं श्रवणं च समानयने – अष्टौ उपभृति ।

धर्मजिज्ञासा । १.१.१ धर्माय जिज्ञासा = जिज्ञासा हि पुरुषस्य ज्ञातुम् इच्छा ।

धर्मं प्रति हि विप्रतिपन्नाः बहुविदः । १.१.१

धात्वर्थव्यतिरेकेण यद्यप्येषा न लक्ष्यते ।
तथापि सर्वसामान्यरूपेणैवावगम्यते ॥ २.१.१ तं.

धारणे विधिरेव स्यात् न हि प्राप्तिः कुतश्चन । समित्प्रच्छादनाशक्तेर् नाचाराद् उपरिस्थिता ॥ ३.४.९ + ६.२ तं. अधस्तात् समिधं धारयेद्, उपरि हि देवेभ्यो धारयति–आप ९.११.९

ध्रौवं साधारणं द्रव्यं देवता मान्त्रवर्णिकी । रूपवन्तौ अतो यागौ विधीयेते पृथक्तया ॥

ध्वजिनो गच्छन्ति इति एकेनापि ध्वजिना सर्वे ध्वजिनः इति कथयन्ति । ३.८.४४

न ऋषीणां यागादिषु आर्षेयान्तराभावात् (भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति) न देवानां यागादिषु अधिकारः देवान्तराभावात् । ६.१.५

न कण्टकः पादेन अधिष्ठेयः । १०.८.२ कण्टको वा न पादेन अधिष्ठीयते ।

न चतुस्त्रिंशद् इति ब्रूयात्, षड्विंशतिरेव ब्रूयात् । ९.४.१८ तत् प्रतिषिध्य प्रकृतिर् नियुज्यते, सा नियुज्यमाना चतुस्त्रिंशद् वाच्यत्वाद् वारयति ।

न च दृष्टे कारणे सति अदृष्टं कल्पयितुं शक्यते । १.१ १,५

न च वृद्धशास्त्राविद्यमानवचनाचेतनार्थबन्धनात् मन्त्रार्थोपयोगः । १.२.४० तं.

न चामूर्तोऽर्थः (अमूर्तः अर्थः न क्रियासाधनं) क्रियासाधनं भवति । ३.१.१२

'न पिता वर्धते न माता' इति अन्ये वर्धन्ते, प्रत्यक्षं कौमारयौवनस्थाविरैर् वर्धन्ते मात्रादयः । ऊहदर्शनं च विवक्षितानाम् अर्थानाम् एव भवति । न मातृपित्रादयः ऊहितव्याः । १.२.५२ सूत्रम् – ऊहः ।

न पिता वर्धते न माता न नाभिः प्राणो हि सः । ३.८.३१ अत्र ऊहो नावकल्पेत् ।

अङ्गानि ज्ञातिनामान्युपमा चेन्द्रियाणि च । एतानि नोहं गच्छन्ति अध्रिगौ विषमं हि तत् ॥ १.३.२४ तं.

न ब्रह्मवर्चसकामस्य अयम् अग्निर् होमार्थो भवति । वृक्षाग्रात् ज्वलतः आहृत्य अवदध्याद् ब्रह्मवर्चसकामस्य । होमस्तु यथाप्राप्ते उल्बे एव । कामनियोगाद् अयम् अग्निर् होमार्थो न भवति ।

न वयं निन्दितान् अनिन्दितान् वा असुरान् विद्मः कदाचिद् हि यस्माद् असुरान् अपि एषा वशीकृत्य आनयीत क्रिया । १.२ तं.

न विषं भक्षयितव्यम्। १०.८.२,७ विषं भक्षयितव्यं न कदाचित्। (विधिप्रतिषेधयोः) प्रतिषेधो बलवान्।

पाम १.१.४९,१५ नष्टाश्वदग्धरथवत् सह संप्रयोगो भवति। (तव अश्वो नष्टः, ममापि रथो दग्धः, उभौ संप्रयुज्यावहै।)

न सप्तदशावराः फलसमवाये भवेयुः। ६.३.२४ सप्तदशावरैर् याजमानाः पदार्थाः कर्तव्याः। ते च निहितेन क्रियन्ते। अफलत्वेऽपि च सङ्कल्पं सत्यं कर्तुम् आनयन्ति (प्रतिनिधीन्)।

न सर्पाय अङ्गुलिं दद्यात्। ६.२.२०; १०.८.२ न सर्पाय अङ्गुलिर् देया।

न सर्वस्वं दक्षिणाकाले देयं, यावता तत् कर्म परिसमाप्यते तावत् शेषयितव्यम्। ६.७.९ सूत्रम् – अपि वा शेषकर्म स्यात् क्रतोः प्रत्यक्षशिष्टत्वात्।

नहि कश्चिद् स्वार्थाद् ऋते परार्थे प्रवर्तते। १०.६.५९

न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतुम्। १.२.७ तं. २.४.२१

नहि प्रत्यक्षम् अनुपपन्नम् अस्ति। १.३.३

नहि येन विधीयते तस्य वाक्यशेषोऽर्थवादः स्यात्। १.२.३१ यथा 'उरु प्रथा उरु प्रथस्व' इति पुरोडाशं प्रथयति। शत १.२.२.७

नहि अज्ञाते अर्थे कश्चिद् बुद्धिम् आलभते। १.१.५

नहि अविद्वान् विहितोऽस्ति। २.१.५ तं. ३.८.१८ ज्ञाते च वाचनम्।

नागवेलायाम् आगन्तव्यं, शङ्खवेलायाम् आगन्तव्यं, पटहवेलायाम् आगन्तव्यम्, अग्निहोत्रवेलायाम् आगन्तव्यं, यस्मिन् ग्रामे नागशङ्खपटहाग्निहोत्रादयो न स्युः तत्रापि स एव कालः। ११.३.४९

नामधेयेन तु प्राजहिते कौण्डपायिनाम् अयने अग्निहोत्रस्य श्रपणं प्राप्यते न शालामुखीये। 'प्राजहितम्' इति गार्हपत्यस्य पूर्वाचार्यसंज्ञा। ज्योतिष्टोमे हि तस्य शालामुखीयस्य गार्हपत्यत्वम्। १२.१.१३ सूत्रम्– श्रपणं च अग्निहोत्रस्य शालामुखीये न स्यात् प्राजहितस्य विद्यमानत्वात्।

नामूर्तोऽर्थः क्रियायाः साधनं भवति। ३.१.१२

'नायं मम'। ९.३.३६ सूत्रम्–उत्सर्गात् च भक्त्या तस्मिन् पतित्वं स्यात्। उत्सृष्टं च यजमानेन 'नायं मम' इति। देवताम् उद्दिश्य 'नायं मम' इत्यनेन स्वस्वामित्वं त्यज्यते।

नारिष्ठहोमपूर्वत्वं दर्विहोमानाम्। ८.४.२० नारिष्ठौ = अग्निवायू = जाठराग्निः प्राणवायुश्च। सायणः, १९ शब्द = चोदनासामान्यात्। "जुहोति" नारिष्ठहोमाः प्रवृत्तिधर्माणः सर्वेष्टिषु सर्वपशुबन्धेषु प्रवर्तमाना दृष्टाः। ८.४.१८

नारिष्ठहोमाः– पूर्वं उपहोमाः, ततो नारिष्ठहोमाः। ५.२.१८

नावयविनम् उपाददीत। ४.१.२८ विद्यमानस्य अवयविनः एकदेश उपादातव्यः उत्तरार्धाद् अवद्यति।

नाश्वं विक्रीणते इति स्मर्यते । १०.३.४७ गाभ्यः अश्वा उपकारकतराः यदि एषां दानप्रतिग्रहविक्रया न प्रतिषिध्येरन् । न केसरिणो ददाति – दानं प्रतिषिद्धम्, उभयतोदतः प्रतिगृह्णाति-प्रतिग्रहः प्रतिषिद्धः, नाश्वं विक्रीणीत, विक्रयश्च प्रतिषिद्धः । तस्माद् द्वादशशतं गवां स्यात् । सूत्रम्-भागित्वाद् वा गवां स्यात् ।

नास्ति हष्टे अनुपपन्नं नाम । १.१.५

निकायिनां च पूर्वस्य उत्तरेषु प्रवृत्तिः स्यात् । ८.१.१९ निकायः सङ्घात औत्तराधर्येण अवस्थितः उच्यते, यथा साहस्राः साद्यस्क्राः । तेषां पूर्वस्य केचिद् धर्मा आम्नाताः, उत्तरे तु अधर्मकाः, तेषां पूर्वस्य उत्तरे प्रवृत्तिः । निगदा वर्तन्ते यजूंषि । यजूंषि वा तद्रूपत्वात् । निगदो मन्त्रान्तरं स्यात् । निगदेन उच्चैर् अनूद्यते ।

नित्या प्रकृतिः, आगन्तुका विकृतिः । कामे वा निमित्ते उत्पन्ने आगच्छति । वैकृतं तन्त्रं प्रकृतौ प्रसज्यते । १२.२.३३,३४

निमित्तार्था हि कालश्रुतयः । ६.२.२७ उदिते जुहोति, अनुदिते जुहोति, प्रातर् जुहोति, सायं जुहोति, प्रदोषे जुहोति, इत्यादयः कालश्रुतयः । आगते आगते काले प्रयोगः कर्तव्यः ।

निर्गुणं च पुनःश्रवणम् इतरेषाम् अश्रुतानां परिसङ्ख्यापकम् भवति । १०.७.४ सूत्रम्-निर्देशात् परिसङ्ख्या स्यात् ।

नीलोत्पलवनेष्वद्य चरन्तश्चारुसंरवाः । नीलकौशेयसंवीताः प्रनृत्यन्तीव कादम्बाः । १.१.२४,२६ रामाकौशेयसंवीताः प्रनृत्यन्तीव कादम्बाः । (पाठान्तरम्)

नैमित्तिकं तु उत्तरात्वं आनन्तर्यात् प्रतीयेत । ९.२.२३/२ त्रैशोकसामसु पूर्वा अतिजगती, उत्तरे द्वे बृहत्यौ उत्तरार्चिकग्रन्थात् ।

नोच्चैर् गेयम्, बलवद् गेयम् । रथन्तरे रथन्तरधर्माः (बृहद् उच्चैर गेयम्) रथन्तरे प्रस्तूयमाने संमीलयेत्, स्वर्दृशं प्रतिवीक्षेत् । बृहद् उच्चैर् गेयम्, बृहति गीयमाने समुद्रं मनसा ध्यायेत् । ९.२.४७,४८ ताण्ड्य-ब्राह्मणे (७.७.९,१०) यद् रथन्तरं प्रस्तौति, समुद्रम् अन्तर्धाय उद्गायेत्, वाग् वै समुद्रः । बलवद् गेयम् ।

पञ्चभिश्च प्रयाजैः, त्रिभिर् अनुयाजैः पुरोडाशस्य कार्यम् । १२.१.२ पश्वर्थानुष्ठितप्रयाजादिभिरेव पशुपुरोडाशस्यापि उपकारसिद्धेर् न पृथग् अनुष्ठानम् ।

आप १०.४.६ पत्नीसंयाजान्ता दीक्षणीये संतिष्ठते ।

पदानां साकाङ्क्षत्वाद् विधेः स्तुतेश्च एकवाक्यत्वम् । १.२.७ वायव्यं श्वेतम् आलभेत, वायुर् हि क्षेपिष्ठा देवता । सूत्रम्– विधिना तु एकवाक्यत्वात् स्तुत्यर्थेन विधिना स्युः ।

पम्पा कुलाय प्रतिमाश्च वृक्षाः । (एतद् ब्राह्मणानि एव पञ्चहवींषि यद् ब्राह्मणानीतराणि) । ७.१.१७ एवम् अर्थवादस्य अतिदेशो भवति ।

पयोविकारः पशुः । ८.२.१८ सूत्रम् – द्रवत्वं च अविशिष्टं, पशुरपि द्रवति, पयोऽपि ।

परमाणुषु व्यभिचारः। ३.१.१२ तं. येषां तावत् "कार्यद्रव्याणि एव घटादीनि पच्यन्ते यथा पैठराणां" तन्मतेन अभेद एव पैलुकानाम् अपि तु परमाणुषु व्यभिचारो घटादीनि द्रव्यान्तरेण...

परस्थैर् वा एते स्वर्गं लोकम् यन्ति ये अनाहिताग्नयः सत्रम् आसते। ६.६.२८ (सारस्वते)

परिक्रयाविभागाद् वा समस्तस्य विकारः स्यात्। १०.६.६७ सूत्रम् – कृत्स्नं हि क्रतुम् अङ्गीकृत्य दक्षिणाः विधीयन्ते।

परिधयो वेदिश्च अङ्गप्रधानार्थत्वात् नारिष्ठहोमाङ्गम्। ८.४.२० नारिष्ठहोमानां जुहोति चोदनात्वात्।

परिभोजनीयनाम बर्हिस्ततो विधृती पवित्रे च कर्तव्याः। ३.८.३२ विधृतिपवित्रयोः परिभोजनीयबर्हिषां कर्तव्यताधिकरणम्।

परिसङ्ख्यायास्त्रयो दोषाः–स्वार्थप्रहाणं, परार्थकल्पना, प्राप्तबाधश्च।

पर्यनुयोगो नाम भवति – यः स्वपक्षं साधयति, विपक्षस्य च प्रतीपम् आचरति। ३.१.१२

पशुपतिर् अनेन उपचरितः पुत्रोऽनेन लब्धः। ९.१.८

तैब्रा ३.२.८.८ पशोर् वा प्रतिमा पुरोडाशः।

पश्वङ्गं रशना चेत् यद्येकस्मिन् बहून् युञ्जीत। प्रतिपशुः रशना कार्या यूपे चेद् द्वैरशन्यं स्यात्। ४.४.२४

सत्या १.१.१९ पारिप्लवार्था दाशतय्यः।

पार्वणस्थालीपाके अष्टकाचरौ आग्रहायणे इतिकर्तव्यताविधिः, सौर्यश्चरुः (सौर्यचरुविध्यन्तः)। ७.४.२

पावकः शीतः। ४.३.१०

पित्रादिकं न देयम्। (विश्वजिति सर्वस्वदाने)। ६.७.२ सूत्रम् – यस्य वा प्रभुः स्याद् इतरस्य अशक्यत्वात्। स्वशब्द आत्मीयधनवाचकः। पित्रादीनाम् अशक्यं स्वत्वं निवर्तयितुम्।

तैब्रा ३.९.१०.१ पुरस्तात् स्वाहाकारा वै अन्ये देवाः, उपरिष्टात् स्वाहाकारा अन्ये।

पूर्वावसायिनश्च बलीयांसो जघनावसायिभ्यः। १२.२.३३

पूर्वावसायिनो जघन्यावसायिनं नोन्नीयन्ते। १२.३.२४

पृष्ठाकोटेन=प्रत्येकद्रव्यनिरीक्षणे पुनःपुनः पृष्ट्वा कुटिलीक्रियते। २.१.३२ तं.

पृष्ठस्तुतौ हि साम विनियुज्यते, तत् च सामपदानां स्तुतिं निर्वर्तयन्तां संश्लेषादिभिर् विशेषैः स्तुतिपदाक्षराणि उपदर्शयत् स्तुतिम् अभिनिर्वर्तयति। १०.६.३

पेषणं, संयवनं (प्रणीताभिः संयौति), संवपनं (वेदेन) सन्तापनम् अधःश्रपणात्, उपधानं (कपालेषु) प्रथनम्, अङ्गारैर् अभ्यूहनं, दर्भपिञ्जुलैर् अवज्वलनं, (कपालेभ्यो व्युद्धृत्य) आसादनम्, एते पुरोडाशधर्माश्चरौ न विद्यन्ते।

प्रकरणान्तरे श्रूयमाणं वाक्यं यस्य प्रकरणे तस्य वाचकं भवति। २.३.२४

प्राकाशौ अध्वर्यवे ददाति। आभरणविशेषौ सौवर्णदर्पणौ।

प्रकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु । धर्मप्रदेशो येन स्यात् सोऽतिदेश इति स्थितिः ॥ ७.१.१ न्यामा.

प्रकृतिर् नित्या, विकृतिर् आगन्तुका । १२.२.३४ कामे वा निमित्ते वा उत्पन्ने आगच्छति । १२.२.३३ अनित्यत्वाद् विकृतेः ।

प्रगीतं मन्त्रवाक्यम् । ९.२.१ गीतिषु समाख्या साम ।

प्रगीतेषु मन्त्रवाक्येषु 'स्तौति' शब्दः, अप्रगीतेषु 'शंसति' शब्दः । ७.२.१७

प्रजापतिः स्याद् वायुर् आकाशः, आदित्यो वा स आत्मनो वपाम् उदक्खिदत् इति वृष्टिं वायुं रश्मिं वा ताम् अग्नौ प्रागृह्णात् इति वैद्युते आर्बीसे लौकिके वा, ततो अज इति अन्नं, बीजं विरुद् वा, तम् आलभ्य—तम् उपयुज्य प्रजाः पशून् प्राप्नोति इति गौणाः शब्दाः । १.२.१०

तैसं ५.५.८ प्रजापतेर् हृदयेन अपि पक्षं प्रति उपतिष्ठते ।

मैसं ३.३.५ प्रतिपशु रशना कार्या । ४.४.२४ – पश्वङ्गं रशना चेत् ...

प्रतिप्रस्थातुश्च वपाश्रपणादपि अभक्षो वा कर्मभेदात् तस्याः (वपायाः) सर्वप्रदानत्वात् । १०.७.२२,२३

प्रत्यक्षम् अनिमित्तं विद्यमानोपलम्भनत्वात् । १.१.४ सूत्रम् – सत्संप्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्यं तत्प्रत्यक्षम् ।

प्रत्यक्षं च अनुमानाद् बलीयः । १२.१.७ तं.

प्रत्यङ्मुखा उदङ्मुखा वा पृष्ठत आदित्यं प्राग्रपदार्थान् प्रतितिष्ठन्ति मानवाः । ३.४.१० तं.

प्रथमं हि स्नेहनं करोति, न द्वितीयम् । ४.१.३८ (तत् स्नेहनं करोति, कतमत् तत्-यत् प्रथमम् ।)

प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति । १.१.५ न्यामा.

प्रयतं पुरुषं त्मना । १.३.३०-३५ न्यामा. मन्त्रेषु आङि आदेर् आत्मनः । आत्मन् शब्दस्य आदेः लोपः छन्दसि ।

प्रयाजाः – समिधस्तनूनपातं इडो, बर्हिः स्वाहाकारं च – तत्र देवतोपदेशाभावात् मान्त्रवर्णिकी देवता भवेयुः । ९.२.५८-६० न्यामा.

प्रयोगश्च उत्पत्तिं न त्यजति । ८.३.४ तं.

प्रयोगाच्च स्मृतिर् बलीयसी । प्रयोगाद् हि स्मृतिर् अनुमीयेत । २.३.३

प्ररोचनया तु प्रवर्तते, द्वेषात् निवर्तते इति तयोः रुचिद्वेषयोर् विवक्षा । १.२.१० प्रवहणसोमसूक्तम् (अष्टौ मन्त्राः) ।

ऐब्रा ३.१,२ 'अस्मे ज्योतिः विक्रयिणि तमः' इत्याह, ज्योतिरेव यजमाने दधाति ।

तैसं ६.१.१० तमसा सोमविक्रयिणम् अर्पयति ।

प्रवीणः–बहुषु वीणावादस्य गुणेषु सत्सु निपुणे एव प्रवीणशब्दो वर्तमानो रूढः इत्युच्यते । ६.७.२२

प्रशंसा सोमशब्दः । सोमो वै वाजिनं, सुरा सोम इत्यत्र । ८.२.६

प्रसिद्धश्च स्थाल्यां चरुशब्दः आ हिमवतः आ च कुमारीभ्यः । १०.१.३५ सूत्रम् – चरुर् हविर्विकारः स्यात् इज्यासंयोगात् । सूत्रम् – प्रसिद्धि-

ग्रहणत्वाच्च । ओदनो वा अन्नसंयोगात्–चरुः ओदनः । १०.१.३४-३६ न्यामा.

प्रसीदति देवता–प्रसन्नोऽस्य पशुपतिः, पुत्रोऽस्य जातः ।

प्रसन्नोऽस्य वैश्रवणः धनम् अनेन लब्धम् । ९.१.७

प्राक्सोमाद् एकपुरोडाशा पौर्णमासी । (ऊर्ध्वं सोमाद् द्विपुरोडाशा)। १०.८ ६२ सूत्रम् – द्विपुरोडाशा स्याद् अन्तरार्थत्वात् । नैकपुरोडाशा । उपांशुयाजम् अन्तरा यजति (पौर्णमास्याम्)।

प्राजहित इति गार्हपत्यस्य पूर्वाचार्यसंज्ञा । १२.१.१३ सूत्रम् – श्रपणं चाग्निहोत्रस्य शालामुखीयेन स्यात्, प्राजहितस्य विद्यमानत्वात् । कौण्डपायिनाम् अयने अग्निहोत्रस्य हविषां श्रपणं प्राजहिते इति नामधेये अग्नौ प्राप्तम् । १२.१.१४

प्राजापत्यं चरुं चरोः घृते श्रपणं, तस्मात् चरुः आज्यविध्यन्तः । ८.१.३७-३९

प्राणैर् वा एष व्यृद्ध्यते यः सर्वं ददाति । पशुभिर् वा एष वृद्ध्यते यः सर्वं ददाति ।

कात्या ९.६.१८,१९,२० प्रातःसवने च उच्चैः कर्माणि कार्याणि, मध्यमेन माध्यन्दिने, उत्तमेन तृतीये सवने ।

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥ २.२ ६.१ तं; १.४.३ न्यामा.

प्रोक्षणीभिर् उद्वेजिता स्मः । १.४.११ अत्र 'प्रोक्षणी' इति जातिशब्दः ।

फलवत्सन्निधौ अफलं तदङ्गम् । ४.४.१९

फलं तु तत्प्रधानायाम् । ४.३.३

बल्वजान् शिखण्डकान् कुरु, बल्वजा एव शिखण्डकाकारेण ईप्सिताः । २.१.१२ द्वितीया विभक्तौ लौकिकप्रयोगं दर्शयितुम् । यथा च तण्डुलान् ओदनं पचति । एवं वेदेऽपि 'सक्तून् जुहोति' कर्मगुणभूतम् अत्र दृश्यते ।

बहवः सत्रं यजेरन् । १०.६.४५,४६ सूत्रम् – वचनात् तु बहूनां स्यात् । सत्रम् आसते – उपयन्ति – उपेयुः ।

बहिष्पवमानम् । १.४.३ पवमानार्थं मन्त्रकत्वाद् बहिः सम्बन्धाच्च ।

बाधो नाम यदेव इदम् इति निश्चितं विज्ञानं कारणान्तरेण मिथ्येति कल्प्यते । १०.१.१

बाहीकवत् । ७.१.८ सूत्रम् – यदि वा अपि अभिधानवत् सामान्यात् सर्वधर्मः स्यात् बाहीकवत् । बहुशो बाहीकानां यवान्नप्रियता, बाहीको अतिथिर् आगतः, यवान्नम् अस्य प्रक्रियताम् (देशनिमित्तेन यवान्नप्रियता)।

बाहीकोऽतिथिर् आगतः, यवान्नम् अस्मै प्रक्रियताम् इत्युक्ते यो यो बाहीकस्तस्य तस्य यवान्नं क्रियेत । एवं पदार्थधर्मा कार्याः । ७.१.८,९

ब्रह्मचर्यं च अहिंसा च अपरिग्रहं च सत्यं च यत्नेन रक्षेत्, श्रुतौ च शाक्ये च । १.३.५-७ न्यामा.

'ब्रह्मचारिणा मांसं न भक्षयितव्यम्' इत्युक्ते दर्विगतम् अपि लेपं वर्जयितव्यम् । ९.४.३९ सूत्रम्–व्रतधर्माच्च लेपवत् ।

मैसं ३.२.३ ब्रह्म यजुः ।

ब्राह्मणस्य सोमपूर्वत्वम् । ५.४.१० सूत्रम् – उत्कर्षाद् ब्राह्मणस्य सोमः स्यात् आग्नेयो ब्राह्मणः सोमेन इष्ट्वा अग्नीषोमीयो भवति ।

ब्राह्मणा वा राजन्यचमसान् अनुसर्पेयुः । ३.५.५३ सूत्रम् – ब्राह्मणा वा तुल्यशब्दत्वात् ।

भविष्यन् वा एषोऽर्थो (कर्मफलार्थो) न ज्ञानकालेऽस्ति । १.१.४

भसद्वीर्या हि पत्नयः । भसदा वा एताः परगृह्णाणाम् ऐश्वर्यम् अवरुन्धते । ६.१.१६

भाक्तो हि अन्यासु अष्टमीषु एकाष्टकाशब्दः, एषा हि मुख्या या माघ्यां वृत्ता । ६.५.३४

भावशब्दाः – यजति, ददाति, जुहोत्यादयः, अपूर्वस्य चोदकाः । भावाः कर्मशब्दाः अपूर्वं चोदयन्ति । २.१.१ धातवः

भूतभव्यसमुच्चारणे भूतं द्रव्यं, भव्यं भविष्यत्फलार्थे च । १०.८.१६

भूतं भव्याय उपदिश्यते । ३ ४.४०; ४.१.१८; ४.२.१०; ६.१.१; ९.१.४

भूमिरथिको भूमौ रथम् आलिख्य शिक्षां करोति, सङ्ग्रामे प्राशुभावो भविता इति । यथा च छात्रः शुष्केष्टीः प्रयुङ्क्ते, प्रयोगे प्राशुकर्मा भवितास्मि इति एवम् अर्धपञ्चमान् मासान् अध्ययनं प्रयुज्यते । ९.२.१३,१२

भृत्या आनमति–दक्षिणया परिक्रीय वशं करोति । १०.२.२२-२८ न्यामा.

मन्त्रकार्याणां तर्हि संहत्य कारित्वाद् एकविनाशे समस्तावृत्तिः स्यात् । नैतदस्ति तद् विनाशानुरोधेन एव अनुष्ठानम् ।

मन्त्रभूतानि एतानि आर्षाणि – (' कयानश्चित्र आ भुवत् ' आदीनि) नित्यानि सामानि ऋक्षु अधिष्ठितानि । ९.२.१

मन्त्रवर्णाद् हि कल्प्या प्रयोगवचनेन श्रुतिः । यथा ' छागस्य वपाया मेदसोऽनुब्रूहि ' इति छागः कल्प्यते । ६.८.३२

मन्त्राणां संनिपातित्वाद् एकार्थानां विकल्पः स्यात् । १२.३.२९ पूषा वां विभजतु, भगो वां विभजतु, अर्यमा वां विभजतु त्रयाणाम् एकार्थानां मन्त्राणां विकल्पः स्यात् ।

मस्तु शूद्रस्य । ६.१.३१ (मण्डं दधिभवं मस्तु । वस्त्रनिःसृतदधिजलम् एके–अमरः) मस्त्वेव शूद्रस्य । व्रते अपि शूद्रस्य नियम्यते–मस्तु एव शूद्रस्य व्रतम् ।

महाभारत ३.११३.११७ महाजनो येन गतः स पन्थाः ।

मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात् । १.१.२ न्यामा.

कात्यास्मृ ९.१० माषकोद्रवगौरादि वर्जयेत् । गौरादि-सरसू-मोहरी ।

' मासम् अग्निहोत्रं जुह्वति ' इत्येवमादीनि प्राग् अग्नीषोमीयात् । एषु उपांशुत्वसम्बधो भवति – यथा पूर्वपक्षः । यथा तर्हि सिद्धान्तः न सम्बधः । ९.१.२५

मासेन शूद्रीभवति । १.२.३ तं. इत्येवम् आदीनि कर्मनिन्दावचनानि,

अथवा 'वर्णत्रयकर्महानिप्रतिपादनार्थानि' इति वक्तव्यम् । किं कृत्वा शूद्रीभवति इत्यपि नोक्तम् ।

मासो देवता संवत्सरो देवता । १०.४.२१ न्यामा.

मिश्रस्य अन्येन हविषा समवद्यति । ३.५.३ सूत्रम् – एकस्मिन् समवत्तशब्दात् । आज्यावदाने क्रियमाणे समवद्यति ।

मुख्यं वाऽपूर्वचोदनात् लोकवत् । १०.५.१,६० सूत्रम्–मुख्येन वा नियम्येत ।

मृश्यामहे हविषो विशेषणम् । ६.४.२३ आर्तिहविर् इति ।

मौद्गं चरुं निर्वपेत् श्रियै श्रीकामः । ९.३.३

य ऋगक्षरेभ्योऽधिको, न च तैः सवर्णः स स्तोभो नाम । ९.२.३९ (अधिकत्वे सति ऋत्विग्लक्षणवर्णः स्तोभः)

य एव लौकिकाः शब्दास्त एव वैदिकास्त एव तेषाम् अर्थाः । १.३.३०

यच्च नाम ज्ञानं तन्न विपर्येति । १.१.५

यच् चळूप्यमाणायाः अपरम् उद्वासितायाः । ४.१.३९ (यत्तावत शृप्यमाणायाः)

यजतिचोदनाद् अहीनत्वं स्वामिनां च अस्थितपरिमाणत्वात् । ८.२.२४,२५ अपि वा यजतिश्रुतेः अहीनप्रवृत्तिः स्यात् प्रकृत्या तुल्यशब्दत्वात् ।

'यजति ददाति जुहोति' इति आख्यातशब्दाः, सर्वेषु उत्सर्गः समानः । २.२.१; ४.२.२७ जुहोतौ आसेचनम् अधिकम् ।

मैसं ३.९.८ यजमानम् वा एतद् वृणीते, स वृतो वषट्करोति ।

यजूंषि एव निगदाः । २.१.४ सूत्रम् – यजूंषि वा तद्रूपत्वात् । सूत्रम् – वचनाद् धर्मविशेषः । उच्चैर् निगदेन । ३.२.४१

यज्ञविषयब्राह्मणगतस्तोमविधिवाक्यशेषे यथा माषकं तत्प्रामाण्यात् करिष्यते, न तद् निरपेक्षशुद्धब्राह्मणप्रामाण्यात् । १.३.११ तं. (कृताक्षणसूत्रप्रणयनप्रक्रमे कात्यायनः ।)

यत् तावत् चळूप्यमाणायास्तद् अग्नेर् अर्चींषि दहन्ति, यद् उद्वासितायास्तद् अग्न्यवयवाः उष्मावयवाश्च नाशयन्ति । ४.१.३९ (वपायाः)

यत्रार्चिकानि निवर्तन्ते स्तोभा गेह्याश्च (स्वराश्च) अनुयन्ति । ९.२.३६ सूत्रम्– अन्वयम् (अनुगमनं चापि दर्शयति)

यथा गावो गोपायन्ति । १.४.५ न्यामा. (अथैष गवाऽभिचरन्)

यथाऽन्यप्राये लिखितं दृष्ट्वा भवेद् अन्यः इति मतिः । २.१.१२; २.३.१६; ६.८.२२; ९.४.५०

तैसं १.५.७ यथा वै पुरुषोऽश्वो गौर् जीर्यति एवम् अग्निर् आहितो जीर्यति, संवत्सरस्य पुरस्ताद् अग्निं पावमानीभिर् उपतिष्ठते, पुनर् नवम् एव एनम् अजरं करोति ।

यथाशरीरमात्रेऽपि मातृगर्भात्मवर्तिनाम् । सुखादीनां व्यवस्थैवं सर्वत्रैषा भविष्यति ॥ २.१.५ तं.

तैसं १.८.४ यद् अनीकवतो बर्हिस्तत् सान्तपनीयस्याः। ११.२.१७ साकमेधेषु। अनीकवद् अग्नित्वाद् अनेकवतो बर्हिर् ऊहितेन।

यद् अनुदिते होमकर्म तद् उदिते व्युद्धम्। २.४.८ (यदुदिते होमकर्म तत् कालान्तरे व्युद्धम्-विगतम् ऋद्धं-ऋद्धिरहितम्।

यदाऽनशनं तदा मेधार्हः, मेधश्च यज्ञो, यज्ञश्च त्यागः, त्यागं कर्तुं अर्हस्तपसा क्रियते। ३.८.१० यदि पञ्चपञ्चाशतस्त्रिवृतः न संवत्सराः, अथ यदि संवत्सराः तर्हि न त्रिवृतः। ६.७.३७ सूत्रम्-विप्रतिषेधात्तु गुण्यन्यतरः स्याद् इति लावुकायनः।

यदि पशुर् उखायां पचेत्। ८.२.१४ सूत्रम्-तस्य च पात्रदर्शनात्। तस्य च सांनाय्यस्य यत् पात्रम् उखा सा पशौ दृश्यते।

यदि पुरा दिदीक्षाणाः स्युर् यदि वा गृहपतिर् गृहपतेर् वाऽनुसत्रिणः, इति ते एनं बृहत्सामानं (अतिरात्रम्) उपेयुः, उपेतं ह्येषां रथन्तरम्। पूर्वदीक्षायां प्रयुक्तत्वात्।

यदि प्रतिहोमः क्रियेत, सायम् अग्निहोत्राद् आरभ्य अतिपन्नानि तेनैव आनुपूर्व्याणि होतव्यानि। ६.५.४३ सूत्रम्-प्रतिहोमश्चेत् सायम् अग्निहोत्र-प्रभृति निहूयेरन्।

'यदि बिभीयाद् अभि मा उदेष्यति' इति महारात्रे हवींषि निर्वपेत् फलीकृतैस्तण्डुलैर् उपासीत, अर्धम् हविर् आतञ्चनार्थं निदध्याद्, अर्धं न, यदि अभ्युदियाद् अनेन आतञ्च्य प्रचरेद्, यदि उ न प्रातर् एतेन ब्राह्मणं भोजयेत्।

यदेव किञ्चन अनूचानोऽभ्यूहति आर्षं तद् भवति। १.३.७ तं. (आर्षेयाणि नित्यानि)

यदेवादः पौर्णमासं हविस्तत् तर्हि निर्वपेत्। ५.४.११,१७,१८,१९ (आग्नेयो वै ब्राह्मणः स सोमेन ...।)

यद् बृहद् गायत्रीषु क्रियते ऋक्त्वेन अन्तर् हजते, न च तस्यां सम्भवति। ९.२.२२ (स्थाल्यां सक्तु अवधीयते ..)

यद् यस्य उपकरोति तत् तस्य शेषभूतम्। ३.७.२

यद् योन्यां गायति तद् उत्तरयोर् गायति। ९.२.३२,३४ सामवेदस्य पूर्वार्चिकोत्तरार्चिकौ द्वौ भागौ, पूर्वार्चिके एकर्चानि सूक्तानि योनिभूतानि, तैः सह उत्तरार्चिके एकर्चाधिकानि सूक्तानि पठितानि। यः कोऽपि स्वरक्रमः पूर्वार्चिके पठिताया योनेर् भवति तेनैव स्वरक्रमेण योनिभूत-संयुक्तानाम् उत्तरार्चिकपठितानाम् ऋचां भवति।

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्। तावुभौ पुण्यकर्माणौ पङ्क्ति-पावनपावनौ॥ १.३.२७-२९ तं. (मनुना पङ्क्तिपावनमध्ये वेदादेवो-पलभ्योक्तम्)

यस्तु मेध्यं द्रव्यं शुचौ देशे प्रयतः प्राङ्मुखो दक्षिणेन हस्तेन समाहितमनाः मन्त्रवत् नियमवद् देवतायै उत्सृजति तस्य फलं भवति। ७.४.१

यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सा अर्थलक्षणा । ४.१.२; ८.१.२४

यस्मिंस्तु साधनोपकारे कार्ये तस्मिन्नेव उपकारेऽन्यत् साधनं विधीयते तत्र विकल्पः । ३.१.१२

यस्य च दुष्टं करणम् । १.१.५

यस्य लिङ्गम् अर्थसंयोगाद् अभिधानवद् इति न्यायेन । १०.६.१६

यस्य हि शब्दो हविषा तादर्थ्येन सम्बध्यते सा देवता । ९.२.६०;१०. ४.२३ यस्य यां प्रति तादर्थ्यं सा तस्य देवता ।

यस्यैव पशोर् गुदो न संस्क्रियते, तस्यैव तेन संस्कारेण हानिः स्यात्, तस्मात् समुच्चयः । सूत्रम्–संस्कारं च तत्प्रधानत्वात् ।

'यः कामयेत राष्ट्रम् अस्य प्रजायै स्याद्' इति तस्य औपासने प्रतिहतम् अन्या जुहुयात् । १२.२.४ (राजसूये प्रवृत्ते कर्मणि एतद् वचनम् । तस्मिंश्च काले विहारोऽस्ति । यदि च त्रेता एव लौकिकानां कार्यं साधयेत् सत्यां तस्यां न औपासनः कार्याभावात् स्यात् ।)

यः कृष्णमृत्तिकाप्रायः (देशः) स आह्वीनैबुकादीनाम् । १.३.२२ कृष्णमृत्तिकाप्रायेऽपि अन्येन कुर्वन्ति, तथाऽन्यलिङ्गेऽपि कुर्वन्ति तस्मात् न देशतो व्यवस्था ।

यः शब्दस्य श्रवणाद् एव विनियोगः प्रतीयते स श्रौतः । ३.३.१४

यः शास्त्रस्थानां स शब्दार्थः । १.३.९

यादृशी यस्य योनिस्ततोऽन्यादृशे यो वै विच्छन्दसी साम ऊहति स ऋचं शृणाति, साम वा विलिशति, सामं संशृणाति, ऋचं वा विलिशति । ७.२.१८

सत्या १.१.२७ टीका यान् प्राचीनम् आग्रयणाद् ग्रहान् गृह्णीयात् तान् उपांशु, यान् ऊर्ध्वान् तान् उपब्दिमतः ।

यावज्जीवम् अभ्यसेत् । २.४.२ सूत्रम्–यावज्जीविकोऽभ्यासः ।

यावता कालेन आजानि (अजमांसानि) पच्यन्ते तावता आविकानि (अविमांसानि) विलीयन्ते । ११.४.३७ सूत्रम् – पङ्क्तिवैषम्यात् कुम्भादीनां भेदः स्यात् ।

यावद् यावद् विवादाय मुक्तकं दीयते मनः । अनवस्थादिदोषेण तावद् तावद् विहन्यते ॥ १.३.३० तं.

यावद् वचनं वाचनिकं, तत्र न न्यायः क्रमते । ५.४.१

यावन्ति पदानि एकं प्रयोजनम् अभिनिर्वर्तयन्ति तावन्ति एकं वाक्यम् । २.२.२७

तां १५.७.२ या वै चतुर्विंशति गायत्र्यस्ता अष्टादश अनुष्टुभः ।

याऽसावन्या गौर् आदीयते सा यजमानस्य व्रतधुङ् न भवति । ११.३.४२ (ऋतपेये)

या सुब्रह्मण्या सा तु आवर्तेत । ११.३.२२ सूत्रम् – तत्कालात्तु आवर्तेत प्रयोगतो विशेषसंयोगात् (द्वादशाहे उपसत्काले) ।

या हि वन्ध्या स्मरेद् इदं मे दौहित्रकृतम् इति न मे दुहिताऽस्तीति मत्वा न जातुचिद् असौ प्रतीयात् । १.३.१

ये वेदम् अधीयते ते एव विदुः इदं कर्म कृत्वा इदं फलम् अमुत्र प्राप्नोति । ६.१.५ सूत्रम् – कर्तुर् वा श्रुतिसंयोगात् विधिः कार्त्स्न्येन गम्यते ।

तैब्रा १६.९.६ ये वै यज्वानस्ते पितरो बर्हिषदः ये वा अयज्वानो गृहमेधिनस्ते पितरः अग्निष्वात्ताः ।

येषु सप्तदश सामिधेन्यः (यथा वैश्यस्तोमे सप्तदशानुब्रूयाद् वैश्यस्य) योनिशस्याः । ७.२.१७ सूत्रम् – योनिश्चासौ शस्याश्च ताः ऋचः तुल्यवद् इतराभिः (उत्तरार्चिके पठिताभिः) विधीयन्ते ।

यो वै (सत्रे) बहूनां यजमानानां गृहपतिः, स सत्रस्य प्रत्येता, स हि भूयिष्टाम् ऋद्धिम् आप्नोति । १०.६.५०; १२.४.३०

यो ह्यमेध्यं द्रव्यं उच्छिष्टः शयानो वा प्रौढपादो वा, वामेन हस्तेन पादेन वा यथा कथंचिद् देवताया उत्सृजति तस्य फलं न भवति इति शिष्टाः स्मरन्ति । ७.४.१

यो ह्यर्थः सामान्यस्य विशेषाणां च आश्रयः सा व्यक्तिः । १.३.३३

यौ द्वौ कौरवौ स एको बाहिकः । ८.३.२२ ये हि द्वे गायत्र्यौ सा एका जगती इति परिमाणदर्शनार्थम् ।

रजनी मे कण्डूयति । ८.४.२८ (रागाभावे वक्ति) ।

रशना हि या यावतीं द्रढिम्नो मात्रां यूपस्य संजनयति द्रढिम्ना च प्रयोजनं यूपस्य । ४.४.२३ सूत्रम् – यूपाङ्गं वा ।

वाराह ३.२.४.५० राजसूयेन इष्ट्वा सौत्रामण्या यजेत ।

लभ्यमाने फले दृष्टे न अदृष्टपरिकल्पना । १.१.१ तं. १.१.५

लिङ्गप्रकरणप्राप्तमन्त्रानुवादेन इष्टकोपधानम् । १.४.२८ न्यामा.

लिङ्गादिरहिते वाक्ये तदाविधिरुपेयते । न कथञ्चिद् यदा प्राप्तिलेशो न गम्यते ॥ १.४.९ तं.

लुप्यते वा एतत् षष्ठं कपालं यत् पञ्चकपालं निर्वपन्ति । ८.५.१,२ सूत्रम् – आनुपूर्व्यवताम् एकदेशग्रहणेषु आगमवद् अन्त्यलोपः स्यात् ।

लोकवद् विभागः स्यात् (श्रुतितो वा) । १०.६.८ प्रायणीयोदयनीययोर् ऐकादशिन्यपशूनां विभागः स्यात् ।

लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधकः । १.१.२ न्यामा.

लोकेऽर्थलक्षणः संव्यवहारो वेदे शब्दलक्षणः । ३.१.१६; ६.८.२७

लोके येषु अर्थेषु प्रसिद्धानि पदानि सति सम्भवे तदर्थानि एव सूत्रेषु इति अवगन्तव्यम् ।

लोहितं निरस्यति, शकृत् संप्रविध्यति । ४.१.२७ पशौ अनालम्भात् लोहितशकृतोर् अकर्मत्वम् ।

लौकिकाग्नौ उपनयनहोमाः स्थपतीष्टिस्तथैव च । १.१.१ न्यामा.

वनस्पतयः सत्रम् आसत । १.१.३२; ६.१.४

वयं वाग्यमेन तायमानं यज्ञं विद्मः । ९.१.२४

वरणम् ऋत्विजाम् आनमनार्थं (परिक्रयार्थं सत्रे न स्यात् स्वकर्मत्वात्)। १०.२.३४ सूत्रम्

वरणं सत्रे ऋतुयाज्यावरणहिरण्यदानयोर् अनुष्ठानम् अदृष्टार्थाय स्यात्। १०.२.६२

वर्धमानकं गायति। ७.२.१४,१६ सूत्रम्—तस्मिन् संज्ञाविशेषा स्युः विकारपृथक्त्वात्। वर्धमानकगीतिः, आसारितकगीतिः।

वलीपलितस्य नाशकानि रसायनानि। ६.७.२३

वषट्कारः प्रदानार्थः, याज्या देवतोपलक्षणार्था। १२.३.३५ सूत्रम्—वषट्कारे नानार्थत्वात् समुच्चयः।

वसन्ते प्रातर् आग्नेयीं कृष्णग्रीवाम् आलभते, ग्रीष्मे माध्यन्दिने सिंहीं-संहिताम् ऐन्द्रीं शरदि अपराह्णे, श्वेतां बार्हस्पत्याम्।

वाजपेये क्रतुपशवः प्राजापत्यपशवश्च तत्र अग्निर्गुप्रैषस्य आवृत्तिः स्यात्। ११.४.५४

वाजिनो यजति—दार्शपौर्णमासिको विध्यन्तः। ८.२.१-९ सूत्रम्—वाजिनयागसुराग्रहयोर् ऐष्टिकधर्मत्वम्।

वासिष्ठं गृह्यसूत्रं बह्वृचैर् परिगृहीतम्। १.३.१५ तं.

विकल्पश्च अन्याय्यः। १०.८.४ अन्याय्यत्वाद् विकल्पस्य।

विग्रहो हविषां भागः ऐश्वर्यं च प्रसन्नता। फलप्रदानमित्येतत् पञ्चकं विग्रहादिकम्। ९.१.६

देवता भुङ्क्ते। अर्थानाम् इष्टे देवता। प्रसीदति देवता। देवता यष्टुः फलं ददाति।

विद्याम् अधीयीत। ६.१.३१ सूत्रम्—ब्राह्मणस्य तु सोमविद्याप्रजम् ऋणवाक्यसंयोगात्।

विद्यायां धर्मशास्त्रम्। २.४.१४

विधिरेव भवेद् एवम् अपूर्वोऽर्थो विधास्यते। सर्वानुवादो व्यर्थो हि स्तुतेश्च विधिकल्पना॥ ३.४.९ तं.

विधौ हि न परः शब्दार्थः। १.२.२४

विध्यनुवादयोर् विधिर् ज्यायान्। १०.६.३

विप्रतिपत्तौ हविषा नियम्येत (विध्यन्तः)। ८.१.३२,३३ तेन च कर्मसंयोगात्। तेन—हविषा

विशदसिद्धे ओदने चरुशब्दम् उपचरन्ति। ३.३.३७

विशये प्रायदर्शनात्। २.३.१६ अत्र भगवान् आचार्य उपवर्ष इदम् उदाहृत्य

विश्वजिति द्वादशशतात् न्यूनस्य नाधिकारः। ६.७.१९

विश्वजिति सर्वस्वदाने न पित्रादयो देयाः अप्रभुत्वात्। ६.७.२

विषं भक्षयितव्यं न कदाचित्। १०.८.७; १०.८.२ न विषं भक्षयितव्यत्।

विहार इति गार्हपत्यादिर् अग्निस्त्रेता उच्यते। स लौकिकानि पार्वणस्थालीपाकादीनि साधयति। १२.२.१ सूत्रम्—विहारो लौकिकानाम् अर्थं साधयेत्।

विहारारामण्डलकरणवैराग्यध्यानाभ्यासाहिंसासत्यवचनदमदानदयादि तद् बुद्धादिभाषितं प्रमाणेन अविरुद्धम् इति चेत्। न। शास्त्रपरिमाणत्वात्। १.३.७ तं.

वैद्युतम् अग्निं होमार्थं कुर्यात्। १२·४·२० सूत्रम् – विकारो वा तदुक्तहेतुः। यावद् उक्तं स्यात् 'वैद्युतम् अग्निं होमार्थं कुर्यात्' इति तावद् एव इदम्। वैश्वकर्मण एककपालो भवति।

वैसर्जनहोमीयं वासो अध्वर्युर् गृह्णाति। १·३·४ न्यामा. अध्वर्युर् यजमानं तत्पत्नीं तदमात्यान् तत्रेदिष्टसम्बधिनश्च अहतवाससा प्रच्छाद्य प्रचरण्यां च चतुर्गृहीतं गृहीत्वा प्रच्छादनार्थस्य वाससो अन्तम् उपनियम्य वाससो दशायां हिरण्यं निबध्य आज्ये अवधाय स्रुग्दण्डं वाससो अन्ते उपनियम्य शालामुखीये जुहोति, एतद् वासोऽध्वर्युर् गृह्णाति।

व्यापन्नम्– दूषितं – भोज्यं केशकीटावपन्नं, अन्येन वा उपघातेन उपहतम्। ६·५·४८

व्यापन्नम् अप्सु प्रहरति इति श्रूयते। ६·५·४८ सूत्रम् – व्यापन्नस्य अप्सु गतौ, यद् अभोज्यम् आर्याणां तत्प्रतीयेत।

व्यापृता जुहूर् भवति। ४·१·३३ न वा प्राजापत्यानां पशूनां वपाम् अभिघार्याः प्रयाजशेषाभावात् अपात्रत्वात्। –अपात्रत्वं तु एकदेशत्वात् – प्रयाजार्थस्य हि गृहीतस्य आज्यस्य एकदेशशेषः।

व्यृद्धं उभयथा सम्भवति – यद् अनुदिते होमकर्म तद् उदिते व्यृद्धं, यद् उदिते तत् कालान्तरे व्यृद्धम्। २·४·८

शकृत् संप्रविध्यति लोहितम् अपास्यति। ४·१·२७ लोहितशकृतोर् अकर्मत्वम् लोपः।

शङ्खलिखितोक्तं गृह्यसूत्रं वाजसनेयिभिर् एव परिगृहीतम्। १·३·१५ तं. गृह्यग्रन्थानां च प्रातिशाख्यलक्षणवत् प्रतिचरणं पाठव्यवस्था उपलभ्यते। शतकृष्णलचरुः उपांशुयाजविध्यन्तो भवेत् हिरण्यम् आज्यधर्मस्तेजस्वित्वात्।

शतम् अतिरथं शोभनाम् अशोभनां च कन्यां प्रति–स्मार्तं च श्रुतिविरुद्धं विक्रयं नानुमन्यते। ६·१·१५ सूत्रम् – क्रयस्य धर्ममात्रत्वम्। क्रयो हि उच्चनीचपण्यवणो भवति। नियतं तु इदं दानम्।

शतं भक्षयन्ति। एकस्यां राजन्यजातौ दशसङ्ख्या विधीयते। तेन दशराजन्याः अनुप्रसर्पयेयुः। ३·५·५३ सूत्रम् – ब्राह्मणा वा तुल्यशब्दत्वात्। तस्माद् ब्राह्मणानाम् एव चमसानुसर्पणम्।

शब्दभेदाद् अर्थभेदो न्याय्यः। ६·८·३६

शब्दवती देवता। यस्य हि शब्दो हविषा तादर्थ्येन सम्बध्यते सा देवता। ८·३·२; १०·४·२३

शष्पतोक्मसिंहलोमसु पौरोडाशिको विध्यन्तः। ८·२·८,९ सूत्रम् – पशुपुरोडाशिकस्य च लिङ्गदर्शनम्।

शष्पैरेव दीक्षणीयाम् आप्नोति, तोक्मभिः प्रायणीयां, सिंहलोमभिर् आतिथ्याम् । सोमविकारत्वे प्रत्यक्षम् एव दीक्षणीयादीनि प्राप्नुयुः । प्राप्तानां शष्पादिभिस्तदासिवचनं न उपपद्यते । ८.२.८ व्यपदेशश्च तद्वत् ।

शामित्रे अग्नौ किम् एतस्य पशुपुरोडाशस्य श्रपणं कर्तव्यम् उत शालामुखीये । १२.१.१२ सूत्रम् – शामित्रे च पशुपुरोडाशो न स्यात् ।

शास्त्राणि चेत् प्रमाणं स्युः गतास्ते परमां गतिम् ।
ईजाना बहुभिर् यज्ञैर् ब्राह्मणा वेदपारगाः ॥ १०.८.४२

शिनीनां दार्विहोमिको ब्राह्मणः । अम्बष्ठानां दार्विहोमिको ब्राह्मणः । ८.४.२ सूत्रम् – स (दर्विहोमः) लौकिकानां स्यात्, कर्तुस्तदाख्यत्वात् ।

शिरो वा एतद् यज्ञस्य यद् दीक्षणीया । ४.४.४१

शीतकर्मा हि इन्द्रः । ९.२.३४,३७ ऐन्द्राम् अवभृथसाम गायति ।

शुचिदेवत्ये आग्नेयस्य विध्यन्तः । ८.३.२ अग्नये पवमानाय पुरोडाशम् अष्टाकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये ।

शेषं स्विष्टकृते समवद्यति । २.३.२६ न्यामा. शेषस्य गुणभूतत्वात् ऐडप्राशित्रसौविष्टकृतादीनि शेषकार्याणि ।

शेषकार्याणि -- ऐडप्राशित्रसौविष्टकृतानि । ३.४.४२ सूत्रम् – शेषाद् इडाम् अवद्यति, शेषात् स्विष्टकृतं यजति ।

शृते दधनि च प्रणीताधर्माः कर्तव्याः । ९.२.४४,४५

श्रपणं च अग्निहोत्रस्य शालामुखीये न स्यात् प्राग्वहितस्य विद्यमानत्वात् । १२.१.१३

श्रुतिलक्षणाविषये च श्रुतिर् न्यायसी । १.४.२

श्रुतिश्च स्मृतितो बलीयसी । १२.३.३९

श्रुत्या च ये यस्य प्रकरणे श्रूयन्ते ते तस्यैव धर्माः भवितुम् अर्हन्ति । ७.१.१ तस्माद् यथाप्रकरणं व्यवस्था धर्माणाम् ।

षडहं तृतीयं जागतम् अहर् अन्तरीयमाणं दर्शयन् दशरात्रस्य प्रवृत्तिं दर्शयति । यत् प्रथमं द्विरात्रस्य तद् द्वितीयम् द्वादशाहस्य गायत्रम् अहः । यद् द्वितीयं द्विरात्रस्य तत् तृतीयं त्रैष्टुभं जगती अन्तर् गच्छति । षडहं तृतीयं जागतम् अहर् अन्तरीयमाणं दर्शयन् दशरात्रस्य ।

षड्भिर् अनुष्टुब्भिश्च चतस्रो जगत्यः । ९.२.२८/३ चतुर्विंशतिर्जगत्यस्तृतीयसवनम् एका ककुप् । तत्र श्यावाश्वान्धीगवयोः द्वयोः साम्नोः प्रगाथेन षड् अनुष्टुभः ताश्चतस्रो जगत्यः ।

षड्विधः कर्मभेदः – शब्दान्तरम् अभ्यासः सङ्ख्या गुणः प्रक्रिया नामधेयं च । २.१.१

षष्ठीसमासात् कर्मधारयो बलीयान् । ३.३.२४-३१ न्यामा. निषादस्थपतिः ।

षोडशीसंस्थे प्रातर् अग्निहोत्रप्रभृतीनि अतिपन्नानीति प्रातर् अग्निहोत्रात् समारभ्याणि । ६.५.४४ सूत्रम् – प्रापस्तु षोडशिनि ।

स आहवनीयः स्याद् आहुतिसंयोगात् । १२.४.२६ सूत्रम् – यश्चासौ वैषहरिको अग्निः स आहवनीयः स्यात् । एत्य हूयते अस्मिन् स आहवनीय इति निर्वचनम् ।

स एव तित्तिरिः । १६.२.५६ पञ्चशारदीये उदाहरणम् ।

सकृद् उपस्तृणाति, सकृद् अवद्यति, द्विर् अभिघारयति, चतुर्वत्तस्य आप्त्यै । १०.८.३१ सूत्रम् – ताभ्यां वा सह स्विष्टकृतः सकृत्त्वे द्विर् अभिघारणेन तदासिवचनात् – चतुरवत्तस्य आसिवचनात् ।

सकृद् एव दक्षिणा दीयेत । १०.६.६७ सूत्रम् – परिक्रयाविभागाद् वा समस्तस्य विकारः स्यात् । कृत्स्नं हि क्रतुम् अङ्गीकृत्य दक्षिणा विधीयन्ते । दक्षिणा – परिक्रयस्य अविभागात् समस्ता सकृद् देया ।

सकृद् हिङ्कृत्य बहिष्पवमानेन स्तुवीरन् ।

सकृद् हुतान् चमसान् अभिद्रोणकलशाद् गृह्णाति । सशेषश्चमसो लक्षणम् अन्यस्य उन्नीयमानस्य न च चमसस्थो होतुम् उन्नेतव्यः । प्रेषितो वा । येषु यक्ष्यमाणा देवता प्रति आश्रावित इति । ३.२.३२ (अभ्युन्नीतसोमे)

सङ्क्रमयज्ञेन यजेत अन्नाद्यकामः । २.३,५,११ आवृत्तियज्ञ इति आवृत्ति-सम्बधोऽनुष्ठातव्यः । न यागान्तरम् ।

सत्रम् – अहीनश्च द्वादशाहस्तस्य उभयथा प्रवृत्तिः ऐककर्म्यत्वात् । ४.२.२४ अपि वा यजतिश्रुतेर् अहीनभूतप्रवृत्तिः स्यात् प्रकृत्या तुल्यशब्दत्वात् । ४.२.२५

सत्रम् ब्राह्मणानाम् एव स्यात् । ६.६.१८ सूत्रम् – ब्राह्मणानाम् एव इतरयोर् राजन्यवैश्ययोर् आर्त्विज्याभावात्, राजन्यवैश्ययोर् आर्त्विज्यं प्रतिषिद्धम् स्वयमेव आर्त्विज्यत्वेन विना सत्रं विगुणम् ।

सत्रस्य प्रत्येता । १.१.१ न्यामा. यो वै बहूनां यजमानानां गृहपतिः ।

सत्रे ब्रह्मचरिणोऽपि मधु भक्षयेयुः । १०.६.३३,३२ मधु न प्राश्नीयुः, दीक्षिताः ब्रह्मचारित्वात्, प्राश्येत वा यज्ञार्थत्वात् ।

सप्तमे अहनि ऐन्द्रवायवाग्रता, शुक्राग्रो विषुवान्, आग्रयणाग्रः प्रथमः स्वरसामा, ततो विश्वजित् इति त्र्यनीका समाप्ता । १०.५.८५

सप्तदशोपसत्को वाजपेयः । १.४.७ दीक्षाणाम् उपसदां च दर्शनं नावकल्पेत–सप्तदशदीक्षो वाजपेयः, सप्तदशोपसत्कः वाजपेयः । तुल्यत्वात् क्रिययोः वाजपेयस्य दर्शपूर्णमासयोश्च क्रिया तुल्या ।

समर्थतराणि समानविभक्तीनि दुर्बलो विभक्तिः । १०.३.४२

समस्ता दक्षिणाः विक्रियेरन् । १०.६.६७ परिक्रयस्य अविभागात् क्रतुं कर्तुम् अङ्गीकृतत्वात्, समस्ता दक्षिणा सकृद् दीयेत ।

समाने अहनि आरप्स्यमानो – द्वितीयादिषु अपि प्रयोगेषु समाने (तस्मिन्नेव) एव अहनि दर्शपूर्णमासौ आरप्स्यमानो असौ कृतारम्भणीयाको जातः । ९.१.३५ सूत्रम् – सकृद् वा आरम्भसंयोगात् एकः पुनरारम्भो यावज्जीव-प्रयोगात् ।

समासस्य हि उपसर्जनं विशेषणैर् न सम्बध्यते । ३.४.१३ तं.

समिध्यमानवतीं समिद्धवतीं च अन्तरेण धाय्याः स्युः द्यावापृथिव्योरन्तराले समर्हणात् । ५.३.४

सम्बधिपदव्यवाये हि सम्बधाद् एव पूर्वसंस्कारो न अपैति, यत्रापि अपरेण साकाङ्क्षेण व्यवायः, तत्रापि अस्ति सम्बधः ।

सम्भरणम् एव कुर्वती स्थाली पङ्क्तिं करोति । ६.१.१७

सम्यग् इध्यते अग्निर् याभिर् ऋग्भिः ताः सामिधेन्यः । ३.१.२३ न्यामा.

संस्कारस्य तदर्थत्वात् । विद्यायां पुरुषश्रुतिः । ६.१.३५ विद्यार्जनार्थम् उपाध्यायस्य समीपम् उपनीयते ।

स यदि स्विष्टकृतो होमार्थं विपद्येत, न पुनर्ग्रहणं प्रयोजयेत् – शेषभाजां स्यात् लोपः ।

सर्वपृष्ठे सर्वेषां साम्नां प्रदेशः । ऊर्ध्वं माध्यन्दिनपवमानात् प्राग् मैत्रावरुणसाम्नः, इदम् अन्तरालं सर्वपृष्ठदेशः ।

सर्वमभ्यर्हितं द्रव्यं प्रच्छादनमपेक्षते । यत्र क्वचन न प्राप्ते समित् तत्र नियम्यते ॥ ३.४.९. तं.

द्राह्यायण २.२.५६ सर्वमहः प्रातराहुतेः स्थानं, रात्रिः सायम् आहुतेः ।

सर्वं बलवतः पथ्यम् । १.३.७ तं.

सर्वं भक्षयन्तो, अश्वमेधे न समापयेयुः । भक्षाणां बहुत्वात्, सर्वं न भक्षयेयुः ।

तां ७.८.५ सर्वाणि पृष्ठानि इन्द्रस्य निष्केवल्यानि ।

सर्वार्थं वा आधानस्य स्वकालत्वात् । ३.६.१५

सर्वे छन्दोगाः सह सुब्रह्मण्या भक्षयेयुः । ३.५.२६ सूत्रम् – सर्वे तु वेदसंयोगात् कारणात् एकदेशं स्यात् ।

सवनीयो निरूढः पशुः सौम्यादयश्च एतेषु पशुषु अग्नीषोमीयविध्यन्तः । ८.१.१३

सवित्रश्विपूषशब्दानां विकृतिषु नास्ति व्यूहः । ९.१.३६,३७ न्यामा.

सव्याः (रूक्षा) एतर्हि वपा यर्हि अनभिघृताः, ब्रह्म वै ब्रह्मसाम यद् ब्रह्मसाम्नि आलभते, तेन असव्याः, तेन अभिघृताः । ४.१.३६; ११.२.५३ स (गृहपतिः) सत्रस्य प्रत्येता । १२.४.४१ यो वै सत्रे बहूनां यजमानानां गृहपतिः ...

स स्वर्गः स्यात् सर्वान् प्रति अविशिष्टत्वात् । ४.३.१५ सूत्रम्–अनादिष्टफले कर्मणि स्वर्गफलम् इति प्रत्ययो लोके ।

सहस्रम् ऋतपेये सोमचमसः (त्रैधातव्यायाम्) । १०.२.२२

सहस्रं प्राक् चतूरात्रेभ्यः । ६.७.१७ तं.

सहान्यपदार्थो बहुव्रीहिसमासः पृषा प्रपिष्टभागोऽदन्तको हि ।

साधारणं भवेत् तन्त्रं परार्थे त्वप्रयोजकः ।
एवमेव प्रसङ्गः स्यात् विद्यमाने स्वके विधौ ॥ ११.१.१

सांनाय्ययाजिन एव उपवेषः । तत्र हि सांनाय्यार्था शाखा ताम् अनु निष्पद्यते उपवेषः ।

सामान्यवचनेन विशेषापेक्षिणोपक्रमो वाक्यस्य विशेषे निगमनम् । १.४.२९

सामान्ये हि दृष्टोऽर्थो भवति न विशेषे । २.१.४६

साम्ना अपि हि दृष्टम् अदृष्टं वा क्रियते, तस्मात् साम अपि धर्मप्रयोजने समर्थम्। ९.२.५०

सांविज्ञायिकः स्विष्टकृत्। न व्युत्पाद्यते, अग्निरेव स्विष्टकृत् शब्देन उच्यते। १०.४.३४

'सा हि तस्य ज्ञातुम् इच्छा' इति जिज्ञासा। १.१.२
अथातो धर्मजिज्ञासा।

सिद्धसाध्यस्वभावाभ्यां धात्वर्थौ द्विविधस्तयोः। अन्योत्पादानुकूलात्मा भावना साध्यरूपिणी॥ २.१.१ न्यामा.

सीसेन क्लीबात् क्रय्या (सुरा)। ८.२.४ (सौत्रामण्याम्)

सोमपो न द्वितीयां जायाम् अभ्यषूयते। ६.८.१८ सूत्रम् – सोमपानात्तु प्रापणं द्वितीयस्य तस्माद् उपयच्छेत।

सोमपूर्वत्वम् एव ब्राह्मणस्य। ५.४.१०.१२ सूत्रम् – उत्कर्षात् ब्राह्मणस्य सोमः।

सोमविक्रयी तु अन्यः ऋत्विग्भ्यः। ३.७.३१ सूत्रम् – विक्रयी तु अन्यः कर्मणो अविदितत्वात्।

तैब्रा ३.२.३.११ सोमः खलु वै सान्नाय्यम्, य एवं विद्वान् सान्नाय्यम् पिबति अपुनर्भक्ष्योऽस्य सोमपीथो भवति।

सोमो वै वाजिनम्। ८.२.१,६ सूत्रम् – प्रशंसा सोमशब्दः।

स्तूयते स विधीयते। १.४.२९ न्यामा. विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः।

स्तौति स्तुवते प्रगीतमन्त्रवाक्येषु। शंसति अप्रगीतेषु। ७.२.१७

स्थपतिर् निषादः स्यात्। ६.१.५१ निषाद एव स्थपतिः इति समानाधिकरण एव समासः।

स्थपतेर् इष्टिर् लौकिकाग्नौ स्यात्। ६.८.१२ सूत्रम्– स्थपतीष्टिवत् लौकिके।

'स्थाल्यां सक्तु अवधीयते' इत्याहुः यद् बृहद् गायत्रीषु क्रियते ऋक्तेन अन्तर् रुजतीति। न च अस्यां सम्भवति इति विच्छन्दस्कासु दोषं ब्रुवन् समानच्छन्दस्कासु गानं दर्शयति। समानच्छन्दस्कासु एव तिसृषु ऋक्षु गानाधिकरणम्।

स्थाल्या यागः कर्तव्यः। १०.१.३७ चरुणा। प्रसिद्धश्च स्थाल्यां चरुशब्दः आ हिमवत आ च कुमारीभ्यः।

स्रुग्दण्डे समिधम् उपगृह्य अनुद्रवति। ३.४.९+६ तं.

स्रुवेणाथ स्वधितिना हस्तेनावद्यत्यमी।
आज्ये मांसे पुरोडाशे सङ्कीर्णा वाऽवस्थिताः॥

स्वस्थानविवृद्धिर् वा अह्नाम् अप्रत्यक्षसङ्ख्यत्वात्। १०.५.८४ तस्माद् आग्रयणाग्रान् कृत्वा ऐन्द्रवायवाग्राः कर्तव्याः।

स्वरसामैककपालामिक्षम्। ७.१.२३; ७.३.२६ सूत्रम् – स्वरसामैककपाला-मिक्षं च लिङ्गदर्शनात्।

स्वरुर् यूपाङ्गम् इति चेत् एकस्यैव समञ्जनम् ।
बहूनां एकयूपत्वे सर्वेषां समञ्जनम् ॥

स्वामिकर्म – परिक्रयः (दक्षिणा) कर्मणस्तदर्थत्वात् । ३.८.१
स्विष्टकृद् आवापिकोऽनुयाजे स्यात्, प्रयोजनवद् अङ्गानाम् अर्थसंयोगात्, न बाह्यः । १०.४.३८ सूत्रम् – आवापिक – आवापस्थानम् – आज्यभागस्विष्टकृतौ अन्तरा आवापस्थानम् ।

हरति – प्रहरति = यजति । ३.२.१३ सूक्तवाकेन प्रस्तरं प्रहरति ।

हविर्धाने मानसं ग्रहं गृह्णाति पृथिव्या पात्रेण समुद्रं रसाम् अनुपयाम–गृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि ।

पा ७.१.३९ काशिका हविर्धाने यत् सुन्वन्ति तत् सामिधेनीर् अन्वाह ।

हविषा वा नियम्येत तद् विकारत्वात् । ८.२.५ दार्शपौर्णमासिकहविषो विकारः सुरा, वाजिनम् ।

हविःसामान्यं च देवतासामान्याद् बलीयः। ८.१.३२; ८.२.१३ विप्रतिपत्तौ हविषा नियम्येत, कर्मणस्तदुपाख्यत्वात् ।

हिरण्ये औषधस्य विध्यन्तः । ८.१.३७ सूत्रम् –
हृदयम् उपांशुयाजः । २.२.१२ तं. शिरो वा एतद् यज्ञस्य यद् आग्नेयः, हृदयम् उपांशुयाजः ।

हेतुर् निर्वचनं निन्दा प्रशंसा संशयो विधिः । परक्रिया पुराकल्पो व्यवधारण-कल्पना ॥ उपमानं दशैते तु विधयो ब्राह्मणस्य तु । एतत् स्यात् सर्ववेदेषु नियतं विधिलक्षणम् ॥ २.१.३३ सूत्रम् – शेषे ब्राह्मणशब्दः । तत्र शेषशब्दप्रयोगात् लक्षणानभिधानाच्च सूत्रव्याख्यानम् एव इदम् ।

होता यक्षत् समिधा अग्निम् इडस्पदे । अश्विनेन्द्रसरस्वतीम् । सौत्रामण्याम् ।

होममाश्रितो गुणः फलं साधयति । २.२.२६

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१	२६	°गृह्वान्	°गृह्वान्
२	३८	तब्रा	तैब्रा
४	१३	अग्निरदं	अग्निरिदं
४	१८	तब्रा	तैब्रा
८	३७	तसं	तैसं
९	८	तआ	तैआ
२०	२१	४.३.२	४.३.१
२१	१	अमास्यायां	अमावास्यायां
२१	२४	अंशुरशुस्ते	अंशुरंशुस्ते
२२	१	एयः	एषः
४०	१२	इन्द्रमित्रावरुणपीतस्य	इन्द्रमरुत्पीतस्य
५१	५	उषपुटैर्	ऊषपुटैर्
६१	१८	स्तोमो	स्तोभो
६४	२४	८.३	६.८
७१	२४	२.६.१०	२.५.१०
७२	३७	दिजोत्तमैः	द्विजोत्तमैः
७३	३४	१.४.११	८.१.६
७५	१८	चतुर्मिर्	चतुर्भिर्
७७	३७	जगतों	जगतीं
७९	२	वे	वै
८०	२९,३०	तण्डुलेर्	तण्डुलैर्
८०	३७	न	तेन
८१	५	प्रथोजको	प्रयोजको
८३	२९	काठकसं ८.१	द्र. तैसं २.२.५
८९	३३	महाभरते	महाभारते
९३	१६	हस्तो	हस्तौ
९४	९	मैत्रवरुणाय	मैत्रावरुणाय
९५	१०	दर्शपूर्णसयोर्	दर्शपूर्णमासयोर्
९६	१०	महाव्रतं	महाव्रतं
१०७	३७	२.२.५	२.५.५
१४२	३३	°ग्दण्डम्	स्रुग्दण्डम्
१४३	५	समिता	संमिता
१४३	१२	मन्त्रेर्	मन्त्रैर्
१५४	१९	पयासा	पयसा

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१५५	४	त्रधा	त्रेधा
१७१	३८	विघेयश्च	विधेयश्च
१७९	२४	तण्डूलीभवनम्	तण्डुलीभवनम्
२०८	१३	आध्युर्घ्नीं	अध्यूध्नीं
२०९	२१	ह्वोता	होता
२०९	२८	उदगयन	उदगयन...
२१०	२६	गोणशब्दः	गौणशब्दः
२१०	३४	अहिताग्निर्	आहिताग्निर्
२११	२५	इयुः	ईयुः
२१३	२३	प्रणीत याः	प्रणीतायाः
२१३	३८	षिबति	पिबति
२१४	८	दर्विहौमिको	दार्विहोमिको
२१४	१६	अर्थकल्पाना	अर्थकल्पना
२१४	२९	विहितेतिकर्तव्यताद्- काधर्मान्	विहितेतिकर्तव्य- ताकाद्धर्मान्
२१६	२५	ऊजेत्वा	ऊर्जे त्वा
२१७	२९	पुराकल्प्याः	पुराकल्पः
२१८	३४	यत्	यः
२१८	३४	अनुपैत्यैतां	अनुपपत्त्यैतां
२२८	११	उपयुज्थ	उपयुज्य
२३४	११	भूयिष्टाम्	भूयिष्ठाम्
२३४	२४	लिङ्गादिरहिते	लिङ्गादिरहिते
२३४	२५	१.४.९ तं.	३.४.९+५ तं.
२३५	३०	संयोगातू	संयोगात्
२३५	३५	भक्षयितव्यत्	भक्षयितव्यम्
२३५	३७	पार्वणस्थालीपाकीदीनि	पार्वणस्थालीपाकादीनि
२३६	४	आग्निं	अग्निं
२३६	५	आग्निं	अग्निं
२३६	२९	°पण्यवणो	°पण्यपणो
२३८	२	वैषहरिको	वैहारिको
२३९	१७	बहूत्वात्	बहुत्वात्
२३९	२५	आलमते	आलभते
२४०	३	स्विकृत्	स्विष्टकृत्

उक्तानुक्तचिन्ता

५ पृष्ठे ३६ पङ्क्तौ
अग्निहोत्रवेलायाम् आगन्तव्यम् । ११.३.४८ । इदमुद्धरणम् अनुपलब्धमूलम् । अतः परिशिष्टे अन्तर्भाव्यम् ।

६८ पृष्ठे १५ पङ्क्तौ
क्रियते च । इत्यस्यानन्तरं ३.४.१३ तं. इति पठितव्यम् ।

८४ पृष्ठे २ पङ्क्तौ
याजयन्ति । इत्यस्यानन्तरं १०.२.२६ इति पठितव्यम् ।

८४ पृष्ठे ३ पङ्क्तौ
तस्माद् इत्यस्य पूर्वम् – आप १०.१४.३-७, मैसं ३.६.५ इति पठितव्यम् ।

९१ पृष्ठे २० पङ्क्तौ
प्रदानि । इत्यस्यानन्तरं ४.४.४० इति पठितव्यम् ।

२०७ पृष्ठे ३८ पङ्क्तौ
पराभवति ॥ इत्यस्यानन्तरं ५.४.२४ शाभा इति पठितव्यम् ।